Ambika – Radhika, tomorrow I'll go to the temple to offer prayer. Will you come with me?
राधिका – अम्बिके, त्वं कतिवादने गमिष्यसि? किं सायंकाले गमिष्यसि?
Rādhikā – *Ambikē, tvaṁ kativādanē gamiṣyasi? Kiṁ sāyaṁkālē gamiṣyasi?*
राधिका – अम्बिका, तुम कितने बजे जाओगी? क्या शाम को जाओगी?
Radhika – Ambika, at what time will you go? Will you go in the evening?
अम्बिका – नैव, अहं प्रातःकाले अष्टवादने गमिष्यामि। किं तस्मिन् काले तव अन्यत् कार्यम् अस्ति?
Ambikā – *Naiva, ahaṁ prātaḥkālē aṣṭavādanē gamiṣyāmi. Kiṁ tasmin kālē tava anyat kāryam asti?*
अम्बिका – नहीं, मैं सवेरे आठ बजे जाऊँगी। क्या उस समय तुम्हारा और कोई काम है?
Ambika – No, I'll be going at eight o'clock in the morning. Do you have some other work at that time?
राधिका – आम्, श्वः प्रातःकाले अहं जनकेन सह आपणम् गमिष्यामि।
Rādhikā – *Ām, śvaḥ prātaḥkālē ahaṁ janakēna saha āpaṇam gamiṣyāmi.*
राधिका – हाँ, कल सवेरे मैं पिता जी के साथ दुकान जाऊँगी।
Radhika – Yes, tomorrow I'll be going to the shop with father.

अम्बिका – भवतु। अहं तावत् लतया सह गमिष्यामि। तव जनकः आपणात् किम् आनेष्यति?
Ambikā – *Bhavatu. Ahaṁ tāvat Latayā saha gamiṣyāmi. Tava janakaḥ āpaṇāt kim ānēṣyati?*
अम्बिका – अच्छा। तो फिर मैं लता के साथ जाऊँगी। तुम्हारे पिता जी दुकान से क्या लाएँगे?
Ambika – All right! Then I will go with Lata. What will your father bring from the shop?
राधिका – सः मह्यम् पादत्राणम् आनेष्यति, मम अग्रजाय एकां पेटिकां, मम अनुजाभ्याम् च वस्त्राणि। अहं तुभ्यम् अपि किंचित् आनेष्यामि। मन्ये तव लेखनी नास्ति?
Rādhikā – *Saḥ mahyam pādatrāṇam ānēṣyati; mama agrajāya ēkāṁ pēṭikāṁ, mama anujābhyām ca vaṡtrāṇī. Ahaṁ tubhyam api kiñcit ānēṣyāmi. Manyē tava lēkhanī nāsti?*
राधिका – वे मेरे लिए जूते लाएँगे; मेरे बड़े भाई के लिए एक बस्ता और मेरे छोटे भाइयों के लिए कपड़े। मैं तुम्हारे लिए भी कुछ लाऊँगी। मैं सोचती हूँ कि तुम्हारी लेखनी नहीं है?
Radhika – He will bring a pair of shoes for me, bag for my elder brother and clothes for my (two) younger brothers. I'll bring something for you also. I think you don't have a pen?
अम्बिका – सत्यं वदसि। अहं चिन्तयामि यत् सा मार्गे कुत्रचित् पतिता स्यात्।
Ambikā – *Satyaṁ vadasi. Ahaṁ cintayāmi yat sā mārgē kutracit patitā syāt.*
अम्बिका – तुम ठीक कहती हो। मैं सोचती हूँ कि वह रास्ते में कहीं गिर गई होगी।
Ambika – You are right. I think that it might have fallen somewhere on the road.
राधिका – सखि, अद्य सायंकाले मम अनुजौ मम अग्रजेन सह मंदिरं गमिष्यतः। तैः सह मे अम्बा भगिन्यौ चापि भविष्यन्ति। तर्हि त्वमपि तैः सह कथं न गच्छसि?
Rādhikā – *Sakhi, adya sāyaṁkālē mama anujau mama agrajēna saha mandiraṁ gamiṣyataḥ. Taiḥ saha mē ambā bhaginyau cāpi bhaviṣyanti. Tarhi tvamapi taiḥ saha kathaṁ na gacchasi?*
राधिका – मित्र, आज शाम को मेरे दोनों छोटे भाई मेरे बड़े भाई के साथ मंदिर जाएँगे। उनके साथ मेरी माँ और मेरी दो बड़ी बहनें भी होंगी। तो फिर तुम भी उनके साथ क्यों नहीं चली जाती हो?
Radhika – Friend, today evening my two younger brothers will be going to the temple with my elder brother. My mother and my two elder sisters will also be going with them. Then why don't you too go with them?

अम्बिका – यदि एवमस्ति, तर्हि अहं सायंकाले तैः सह एव गमिष्यामि। प्रातःकाले उमया सह किंचित् पठिष्यामि लेखिष्यामि च।

Ambikā – *Yadi ēvamasti, tarhi ahaṁ sāyaṁkālē taiḥ saha ēva gamiṣyāmi. prātaḥkālē Umayā saha kiñcit paṭhiṣyāmi lēkhiṣyāmi ca.*

अम्बिका – यदि ऐसा है, तो फिर मैं शाम को उन्हीं के साथ चली जाऊँगी। सुबह के समय मैं उमा के साथ कुछ पढूँगी और लिखूँगी।

Ambika – If this is so, then in the evening I would better go with them. In the morning I'll read and write something in the company of Uma.

राधिका – कास्ति सा उमा? किं सापि काचित् अन्या सखी अस्ति?

Rādhikā – *Kāsti sā Umā? Kiṁ sāpi kācit anyā sakhī asti?*

राधिका – वह उमा कौन है? क्या वह कोई और सहेली है?

Radhika – Who is that Uma? Is she some other friend?

अम्बिका – नहि-नहि; उमा मम अग्रजास्ति। सा विश्व-विद्यालयस्य छात्रास्ति।

Ambikā – *Nahi-Nahi; Umā mama agrajāsti. Sā viśva-vidyālayasya chātrāsti.*

अम्बिका – नहीं-नहीं; उमा मेरी बड़ी बहन है। वह विश्वविद्यालय की छात्रा है।

Ambika – No, no; Uma is my elder sister. She is a student of the university.

राधिका – अहमपि कदाचित् विश्वविद्यालये पठिष्यामि। किं त्वं, तव अग्रजः च विश्वविद्यालये न पठिष्यथः?

Rādhikā – *Ahamapi kadācit viśvavidyālayē paṭhiṣyami. Kiṁ tvaṁ, tava agrajaḥ ca viśvavidyālayē na paṭhiṣyathaḥ?*

राधिका – मैं भी कभी विश्वविद्यालय में पढूँगी। क्या तुम और तुम्हारे बड़े भाई विश्वविद्यालय में नहीं पढ़ोगे?

Radhika – I'll also study at the university some day. Won't you and your elder brother study at the university?

अम्बिका – कथं न? आवाम् अवश्यं तत्र अध्ययनं करिष्यावः।

Ambikā – *Kathaṁ na? Āvām avaśyaṁ tatra adhyayanam kariṣyāvaḥ.*

अम्बिका – क्यों नहीं? हम दोनों अवश्य ही वहाँ पढ़ेंगे।

Ambika – Why not? Both of us will certainly study there.

राधिका – सखि, अहं त्वाम् एकम् श्लोकम् श्रावयामि। किम् त्वमपि इमम् जानासि? शृणु–

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्म-संस्थापनार्थाय सम्भावामि युगे युगे।।

Rādhikā – *Sakhi, ahaṁ tvām ēkam ślōkam śrāvayāmi. Kim tvamapi imam jānāsi? Śṛṇu-*
Paritrāṇāya sādhūnāṁ vināśāya ca duṣkṛtām;
Dharma-saṁsthāpanārthāya sambhāvāmi yugē yugē.

राधिका – मित्र, मैं तुम्हें एक श्लोक सुनाती हूँ। क्या तुम भी इसे जानती हो? सुनो!
सज्जनों की रक्षा करने के लिए;
दुष्टों के विनाश करने के लिए तथा
धर्म को फिर से स्थापित करने के लिए
मैं समय–समय पर प्रकट होता हूँ।

Radhika – Friend, I'll tell you a verse. Do you also know that? Listen!
For the protection of the righteous people, for
the destruction of the wicked people and for the re-establishment of the Cosmic Order
I manifest myself from time to time.

अम्बिका – जानामि–जानामि। अयम् गीतायाः श्लोकः। अहमपि इमम् स्मरिष्यामि।

Ambikā – *Jānāmi-jānāmi. Ayam Gītāyāḥ ślōkaḥ. Ahampi imam smariṣyāmi.*

अम्बिका – मैं जानती हूँ। मैं जानती हूँ! यह गीता का श्लोक है। मैं भी इसे याद करूँगी।

Ambika – I know, I know! It is a verse from the Gita. I will also memorise it.

राधिका – एवम् अस्तु। सम्प्रति गच्छामि। श्वः पुनः मेलिष्यावः।

Rādhikā – *Ēvam astu. Samprati gacchāmi. Śvaḥ punaḥ mēliṣyāvaḥ.*

राधिका – ऐसा ही हो! अब मैं चलती हूँ। कल फिर मिलेंगी।

Radhika – May it be so! Now I am taking leave. We will meet again tomorrow.

अम्बिका – गम्यताम्! पुनः दर्शनाय!

Ambikā – *Gamyatām! Punaḥ darśanāya!*

अम्बिका – तुम जा सकती हो! फिर मिलेंगी!

Ambika – You may leave! See you again!

* * *

द्वादशः पाठः
Dvādaśaḥ Pāṭhaḥ

पाठ बारह
Lesson-12

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

(1) स्मरण कीजिए – गम् (लृट् लकारः)- *Gam (Lṛṭ Lakāraḥ)*

Remember – गम् (जाना) *Gam (to go)* भविष्यत् काल *(Future Tense)*

गमिष्यति	गमिष्यतः	गमिष्यन्ति
Gamiṣyati	*Gamiṣyataḥ*	*Gamiṣyanti*
गमिष्यसि	गमिष्यथः	गमिष्यथ
Gamiṣyasi	*Gamiṣyathaḥ*	*Gamiṣyatha*
गमिष्यामि	गमिष्यावः	गमिष्यामः
Gamiṣyāmi	*Gamiṣyāvaḥ*	*Gamiṣyāmaḥ*

(2) इन धातुओं के रूप लृट् लकार में लिखिए :-

Conjugate the following verbs in future tense :—

पठ्, वद्, आ-गम्, नी, आ-नी, दा, भू, कृ।

Paṭh, Vad, Ā-Gam, Nī, Ā-Nī, Dā, Bhū, Kṛ.

(3) कोष्ठक में दिये गये धातुओं के उचित रूप लिखिए :-

Write down the correct froms of the verbs given in brackets :—

(क) श्वः दिनेशः कार्यालयं न........................। (गम्)

Śvaḥ Dinēśaḥ kāryālayaṁ na.................... (Gam)

(ख) किं त्वं सायंकाले पुस्तकं ....। (पठ्)?

Kiṁ tvaṁ sāyaṁkālē pustakaṁ .... (Paṭh)?

(ग) अहं प्रतिदिनं प्रातःकाले सूर्यं .... (नम्)।
Ahaṁ pratidinaṁ prātaḥkālē sūryaṁ .... (Nam).

(घ) मम अम्बा प्रतिशनिवासरम् आपणात् फलानि .... (आ नी)।
Mama ambā pratiśanivāsaram āpaṇāt phalāni................. (Ā nī).

(ङ) तव जनकः कुत्र कार्यं ....(कृ)?
Tava janakaḥ kutra kāryaṁ......................(Kṛ)?

(च) परश्वः विद्यालये अवकाशः............................। (भू)
Paraśvaḥ vidyālayē avakāśaḥ.........................(Bhū).

(छ) अवकाशे यूयम् किं ....(कृ)?
Avakāśē yūyam kiṁ..........................(Kṛ)?

(ज) मया सह कः कन्दुकं ....(क्रीड्)?
Mayā saha kaḥ kandukaṁ..................(Krīḍ)?

(झ) द्वौ मयूरौ प्राङ्गणे................................(नृत्)।
Dvau mayūrau prāṅgaṇē ....(Nṛt).

(ञ) अद्य सायंकाले वयं किं.........................(पा)?
Adya sāyaṁkālē vayaṁ kiṁ..................(Pā)?

(4) रिक्त स्थानों में उचित शब्द लिखिए :-
Fill in the blanks with the appropriate words :—

उदाहरण - अहं कन्दुकं क्रीडिष्यामि। आवाम् कन्दुकं क्रीडिष्यावः।
Example:- *Ahaṁ kandukaṁ krīḍiṣyāmi. Āvām kandukaṁ krīḍiṣyāvaḥ.*

(1) .... जलाशयात् जलम् आनेष्यामि।
.... *jalāśayāt jalam ānēṣyāmi.*

(2) किं .... तडागात् जलं न आनेष्यसि?
Kiṁ.......................taḍāgāt jalaṁ na ānēṣyasi?

(3) श्वः ....समुद्रे तरिष्यामः।
Śvaḥ......................... samudrē tariṣyāmaḥ.

(4) किं .... विद्यालयं पुस्तकानि नेष्यथः?
Kiṁ......................... vidyālayaṁ pustakāni nēṣyathaḥ?

(5) .... गृहे एव स्थास्यन्ति।
.... *gṛhē ēva sthāsyanti.*

(6) ....क्रीडाङ्गणे किं क्रीडिष्यतः?
.........................*krīḍāṅgaṇē kiṁ krīḍiṣyataḥ?*

(7) .... अस्मिन् नगरे निवत्स्यति।
.... *asmin nagarē nivatsyati.*

(8) .... मया सार्धम् कदा खेलिष्यथ?
.... *mayā sārdham kadā khēliṣyatha?*

(9) .... श्वः मन्दिरे प्रार्थनां करिष्यावः।
........................*śvaḥ mandirē prārthanāṁ kariṣyāvaḥ.*

(10) किं .... बाला उत्सवे गास्यति?
Kiṁ .... bālā utsavē gāsyati?

(5) उदाहरण के अनुसार रिक्त स्थानों में उचित शब्द लिखिए :-

Fill in the blanks with the correct words according to examples given :—

उदाहरणः अयं मम जनकः। अहं जनकेन सह ग्रामं गच्छामि।
Example:–*Ayaṁ mama janakaḥ. Ahaṁ janakēna saha grāmaṁ gacchāmi.*

इयं मम अम्बा।	अहं अम्बया सह आपणं गमिष्यामि।
Iyaṁ mama ambā.	*Ahaṁ ambayā saha āpaṇaṁ gamiṣyāmi.*
इदं मम मित्रम्।	अहं मित्रेण सह पुस्तकं पठामि।
Idaṁ mama mitram.	*Ahaṁ mitrēṇa saha pustakaṁ paṭhāmi.*

(1) एषः विनोदः। त्वं ....सह कथं न गच्छसि?
Ēṣaḥ Vinōdaḥ. Tvaṁ.................saha kathāṁ na gacchasi?

(2) एषा गायिका। एतया ....सह अन्यः कः अस्ति?
Ēṣa gāyikā. Ētayā..................saha anyaḥ kaḥ asti?

(3) प्रकाशः गीतं गास्यति। अन्यः कः ....सह गीतं गास्यति?
Prakāśaḥ gītam gāsyati. Anyaḥ kaḥ...............saha gītam gāsyati?

(4) अहं नगरं गच्छामि। ....सह कः आगमिष्यति?
Ahaṁ nagaraṁ gacchāmi. ....saha kaḥ āgamiṣyati?

(5) त्वं शीघ्रं गच्छ। ....सह सुरेशः अपि गमिष्यति।
Tvaṁ śīghraṁ gaccha. ....saha Surēśaḥ api gamiṣyati.

(6) अयम् अश्वः। ....सह तस्य शावकः अपि अस्ति।
Ayam aśvaḥ. ....saha tasya śāvakaḥ api asti.

(7) इमौ मे हस्तौ। अहं ....कार्यं करोमि।
Imau mē hastau. Ahaṁ ....kāryaṁ karōmi.

(8) इमे तव नेत्रे। त्वं ....किं पश्यसि?
Imē tava nētrē. Tvaṁ ....kiṁ paśyasi?

(9) इयं लता। ....सह के नर्तिष्यन्ति?

Iyaṁ Latā. ....saha kē nartiṣyanti?

(10) तत्र एकः गायकः अस्ति। ....सह अन्ये के आगताः?

Tatra ēkaḥ gāyakaḥ asti. ....saḥ anyē kē āgatāḥ?

(5) कोष्ठक में दिये गये शब्दों के उचित रूप से रिक्त स्थानों को भरिए :-

Fill in the blanks with the proper form of the words given in brackets :-

(i) उदाहरण - शीला पूजनाय पुष्पम् आनयति। (पूजनम्)

Example :- *Śīlā pūjanāya puṣpam ānayati. (Pūjanam)*

(1) अम्बा ....तण्डुलं नयति। (पचनम्)

Ambā .... taṇḍulam nayati. (Pacanam)

(2) शक्तिः ....पुस्तकं क्रीणाति। (पठनम्)

Śaktiḥ .... pustakaṁ krīṇāti. (Paṭhanam)

(3) सुधीरः ....चित्रम् धारयति। (दर्शनम्)

Sudhīraḥ .... citram dhārayati. (Darśanam)

(4) मनोहरः सुरेन्द्रः च..............................फलानि आनयतः। (अशनम्)

Manōharaḥ Surēndraḥ ca....................phalāni ānayataḥ. (Aśanam)

(5) बालिकाः ....वस्त्राणि प्रक्षालयन्ति। (धारणम्)

Bālikāḥ .... vastrāṇi prakṣālayanti. (Dhāraṇam)

(ii) उदाहरण - जनकः मोहनाय रूप्यकम् यच्छति। (मोहन)

Example:- *Janakaḥ Mōhanāya rūpyakam yacchati. (Mōhana)*

(1) अध्यापकः ....पुस्तकं दास्यति। (सुरेश)

Adhyāpakaḥ ....pustakaṁ dāsyati. (Surēśa)

(2) अम्बा ....दुग्धम् आनेष्यति। (बाल)

Ambā ....dugdham ānēṣyati. (Bāla)

(3) तस्मै ....नमः। (देव)

Tasmai ....namaḥ. (Dēva)

(4) राष्ट्रपतिः ....प्रमाणपत्रं प्रदास्यति। (छात्र)

Rāṣṭrapatiḥ ....pramāṇapatraṁ pradāsyati. (Chātra)

(5) छात्राः ....फलानि दास्यन्ति। (शिक्षक)

Chātrāḥ ....phalāni dāsyanti. (Śikṣaka)

(6) भक्ताः प्रार्थनां कुर्वन्ति- ओम् नमः.................................इति। (शिव)

Bhaktāḥ prārthanāṁ kurvanti - Ōm namaḥ ....iti. (Śiva)

(7) (अ) सन्धि कीजिए :-

Join the following words :-

(1) अस्ति + इदम् = ...   (2) गच्छति + इयम् = ...

Asti + idam = ...   *Gacchati + iyam* = ...

(3) फलानि + इमानि = ...   (4) यदि + इच्छति = ...

Phalāni + imāni = ...   *Yadi + icchati* = ...

(5) अपि + इच्छन्ति = ...   (6) रवि + इन्द्रः = ...

Api + icchanti = ...   *Ravi + indraḥ* = ...

(7) सती + ईशः = ...   (8) मही + इन्द्रः = ...

Satī + īśaḥ = ...   *Mahī + indraḥ* = ...

(9) रजनी + ईशः = ...   (10) गौरी + ईशः = ...

Rajanī + īśaḥ = ...   *Gaurī + īśaḥ* = ...

(आ) सन्धिच्छेद कीजिए :-

Disjoin the following words :-

(1) चापि = ...   (6) लतागच्छति = ...

Cāpi = ...   *Latāgacchati* = ...

(2) कास्ति = ...   (7) रमानेष्यति = ...

Kāsti = ...   *Ramānēṣyati* = ...

(3) सापि = ...   (8) सरितागमिष्यति = ...

Sāpi = ...   *Saritāgamiṣyati* = ...

(4) छात्रास्ति = ...   (9) देवालयः = ...

Chātrāsti = ...   *Dēvālayaḥ* = ...

(5) अनुजापि = ...   (10) विद्यालयः = ...

Anujāpi = ...   *Vidyālayaḥ* = ...

(8) कोष्ठक में दिये गये शब्दों के उचित रूपों से रिक्त स्थानों की पूर्ति कीजिए :-

Fill in the blanks with the proper form of the words given in brackets :—

उदाहरण - जनकः आपणात् पादत्राणम् आनेष्यति। (आपण)

Example :- *Janakaḥ **Āpaṇāt** pādatrāṇam ānēṣyati. (Āpaṇa)*

(1) पत्रम् ....पतति। (वृक्ष)

Patram ....patati. (Vṛkṣa)

(2) जनः ....अवतरति। (अश्व)
Janaḥ...............................avatarati. (Aśva)

(3) अहं ....विद्यालयं प्रतिगच्छामि। (गृहम्)
Ahaṁ...............................vidyālayaṁ pratigacchāmi. (Gṛham)

(4) जलम् .... पतति। (आकाश)
Jalam...............................patati. (Ākāśa)

(5) आचार्यः ....आगच्छति। (विद्यालय)
Ācāryaḥ ....āgacchati. (Vidyālaya)

(9) **रिक्त स्थानों में उचित शब्द चुनकर लिखिए :-**
Choose the correct words and fill in the blanks :—

तेभ्यः, मह्यम्, तुभ्यम्, देवेभ्यः, जनकाय, अनुजाभ्याम्।
Tēbhyaḥ, mahyam, tubhyam, Devēbhyaḥ, janakāya, anujābhyām.

उदाहरण- जनकः **तुभ्यम्** किं आनेष्यति? (युष्मद्)
Example:- *Janakaḥ* ***tubhyam*** *kiṁ ānēṣyati? (Yuṣmad).*

(1) जननी .... वस्त्राणि आनयति। (अस्मद्-एक०)
Jananī .... vastrāṇi ānayati. (Asmad-Ēka.)

(2) छात्राः .... पुष्पाणि नेष्यन्ति। (तद्-पुं० बहु०)
Chātrāḥ .... puṣpāṇi nēṣyanti. (Tad-Puṁ. Bahu.)

(3) अहम् ....फलानि दास्यामि। (अनुज-द्वि०)
Aham..............................phalāni dāsyāmi. (Anuja-Dvi.)

(4) ते ....पादत्राणम् क्रीणन्ति। (जनक)
Tē ....pādatrāṇam krīṇanti. (Janaka)

(5) वयं प्रार्थनां करिष्यामः ....नमः इति। (देव-बहु०)
Vayaṁ prārthanāṁ kariṣyāmaḥ ....namaḥ iti. (Dēva—Bahu.)

(6) सः ....पुस्तकं दास्यति। (युष्मद्-एक०)
Saḥ ....pustakaṁ dāsyati. (Yuṣmad—Ēka.)

(10) **रिक्त स्थानों में उचित शब्द चुनकर लिखिए :-**
Choose the correct words and fill in the blanks :—

(अ) अहम्, वयम्, आवाम्, मया, मह्यम्, अस्माकम्, मम, माम्।
Aham, Vayam, Āvām, Mayā, Mahyam, Asmākam, Mama, Mām.

(1) अहं गृहं गच्छामि। ....सह कः आगमिष्यति?
Ahaṁ gṛhaṁ gacchāmi. ....saha kaḥ āgamiṣyati?

(2) इदम् पुस्तकं मम नास्ति। ....पुस्तकं तु गृहे अस्ति।

Idam pustakaṁ mama nāsti. ....pustakaṁ tu gṛhē asti.

(3) यूयम् अत्र किं कुरुथ? ....अत्र पठामः।

Yūyam atra kiṁ kurutha? ....atra paṭhāmaḥ.

(4) किम् अम्बा त्वाम् वदति? नहि, अम्बा...............न वदति।

Kim ambā tvām vadati? Nahi, ambā...............na vadati.

(5) त्वम् कुत्र गमिष्यसि? ....औषधालयं गमिष्यामि।

Tvaṁ kutra gamiṣyasi? ....auṣadhālayaṁ gamiṣyāmi.

(6) युवाम् कदा गास्यथः? ....रात्रौ गास्यावः।

Yuvām kadā gāsyathaḥ? ....rātrau gāsyāvaḥ.

(7) युष्माकं जनकः किं करोति? ....जनकः कृषकः अस्ति।

Yuṣmākaṁ janakaḥ kiṁ karōti? ....janakaḥ kṛṣakaḥ asti.

(8) शीला तुभ्यं किं दास्यति? शीला..............चित्रं दास्यति।

Śīlā tubhyaṁ kiṁ dāsyati? Sīlā..............citraṁ dāsyati.

(आ) त्वम्, त्वया, तव, तुभ्यम्, यूयम्, युवाम्, युष्माकम्, त्वाम् :–

Tvam, Tvayā, Tava, Tubhyam, Yūyam, Yuvām, Yuṣmākam, Tvām :–

(1) ....सह कः गास्यति?

........................saha kaḥ gāsyati?

(2) ....अनुजस्य नाम किमस्ति?

........................anujasya nāma kimasti?

(3) ....कुत्र खेलिष्यथः?

........................kutra khēliṣyathaḥ?

(4) किम् अध्यापकः............वदति? नहि, सः मां न वदति, अपितु.............वदति।

Kim adhyāpakaḥ..........vadati? Nahi, saḥ māṁ na vadati, apitu............vadati.

(5) तव जनकः................किं दास्यति?

Tava janakaḥ....................kiṁ dāsyati?

(6) ....मम चित्रं कदा रचयिष्यसि?

........................mama citraṁ kadā racayiṣyasi?

(7) हे बालकाः, ...किं खादिष्यथ?

Hē bālakāḥ, ...kiṁ khādiṣyatha?

(8) किम् अस्माकम् विद्यालये अवकाशः अस्ति?

नैव,................विद्यालये अवकाशः नास्ति।

Kim asmākam vidyālayē avakāśaḥ asti?

Naiva,..................vidyālayē avakāśḥ nāsti.

(इ) तत्, सा, सः, तस्याः, ते, ताः, तौ, तानि, तव, तेषां, तेन, तस्य :-

Tat, Sā, Saḥ, Tasyāḥ, Tē, Tāḥ, Tau, Tāni, Tava, Tēṣāṁ, Tēna, Tasya :-

(1) ....बालकः अत्र किं करोति?

........................bālakaḥ atra kiṁ karōti?

(2) ....फलम् मधुरम् अस्ति।

......................phalam madhuram asti.

(3) ....अध्यापकेन सह त्वं कदा गमिष्यसि?

........................adhyāpakēna saha tvaṁ kadā gamiṣyasi?

(4) या बालिका जलं पिबति........................नाम किमस्ति?

Yā bālikā jalaṁ pibati........................nāma kimasti?

(5) या अध्यापिका अत्र पाठयति........................नाम किमस्ति?

Yā adhyāpikā atra pāṭhayati.................nāma kimasti?

(6) ये छात्राः तत्र तिष्ठन्ति...................कुत्र निवसन्ति?

Yē chātrāḥ tatra tiṣṭhanti...................kutra nivasanti?

(7) यानि फलानि तस्मिन् वृक्षे सन्ति किं.....................पक्वानि सन्ति?

Yāni phalāni tasmin vṛkṣē santi kiṁ....................pakvāni santi?

(8) मम अनुजौ अद्य नागमिष्यतः यतः.........................गृहे न भविष्यतः।

Mama anujau adya nāgamiṣyataḥ yataḥ.......................gṛhē na bhaviṣyataḥ.

(9) यः जनः मार्गे तिष्ठति किं त्वं..........................पुत्रः असि?

Yaḥ janaḥ mārgē tiṣṭhati kiṁ tvaṁ..................putraḥ asi?

(10) याः ललनाः भोजनं पचन्ति किं त्वं...........................जानासि?

Yāḥ lalanāḥ bhōjanaṁ pacanti kiṁ tvaṁ....................jānāsi?

(11) याः ललनाः भोजनं पचन्ति ....मम नगरे एव निवसन्ति।

Yāḥ lalanāḥ bhōjanaṁ pacanti......................mama nagarē ēva nivasanti.

(12) ये मनुष्याः गीतं गायन्ति किं..........................अन्यत् कार्यं नास्ति?

Yē manuṣyāḥ gītaṁ gāyanti kiṁ......................anyat kāryaṁ nāsti?

(11) संस्कृत में अनुवाद कीजिए :-

Translate into Sanskrit :-

(1) मेरे बड़े भाई का मित्र आ रहा है।

My elder brother's friend is coming.

(2) उस आदमी का घर इस गाँव में है।

This man's house is to be found in this village.

(3) हम शाम को तेरे घर आयेंगे।

We will come at your place in the evening.

(4) वे औरतें कपड़े धो रही हैं। (प्रक्षालय्)

Those women are washing clothes. (*Prakṣālay*)

(5) जो लड़की गा रही है वह मेरे मित्र की बहन है।

The girl who is singing is my friend's sister.

(6) तू मेरी पुस्तक कब लाएगा?

When will you bring my book?

(7) जब पाठशाला में छुट्टी होगी तब मैं तेरी पुस्तक लाऊँगा।

I'll bring your book when the school will be on holiday.

(8) सुबह वे क्या करेंगे? क्या वे मेरे साथ नहीं आएँगे?

What will they do in the morning? Won't they come with me?

* * *

द्वादशः पाठः *Dvādaśaḥ Pāṭhaḥ*

पाठ बारह Lesson-12

शब्दकोशः (*Śabda-kośaḥ* : Vocabulary)

अग्रजा	*Agrajā*	बड़ी बहन	Elder sister
अनुजा	*Anujā*	छोटी बहन	Younger/little sister
अन्य	*Anya*	दूसरा	Other
अद्य	*Adya*	आज	Today
अवकाशः	*Avakāśaḥ*	छुट्टी	Vacation, holiday
अव+तृ	*Ava+Tṛ*	उतरना	To come down
अशनम्	*Aśanam*	खाना	Eating
आपणः	*Āpaṇaḥ*	दुकान, बाजार	Shop
आङ्गणम्	*Āṅgaṇam*	आंगन	Yard
उत्सवः	*Utsavaḥ*	उत्सव, त्योहार	Celebration, festival
ओदनम्	*Ōdanam*	चावल, भात	Cooked rice
औषधम्	*Auṣadham*	दवा	Medicine
औषधालयः	*Auṣadhālayaḥ*	दवाखाना	Pharmacy
एवम्	*Ēvam*	इस प्रकार	Like this
कन्दुकम्	*Kandukam*	गेंद	Ball

कदाचित्	*Kadācit*	कभी; कहीं	Sometime; lest
का (किम्)	*Kā (Kim)*	कौन (स्त्रीलिंग)	What (f.)
काचित्	*Kācit*	कोई (स्त्रीलिंग)	Somebody (f.)
कार्यम्	*Kāryam*	काम	Work
कार्यालयः	*Kāryālayaḥ*	दफ्तर	Office
कुत्रचित्	*Kutracit*	कहीं, किसी जगह पर	Somewhere
कृषकः	*Kṛṣakaḥ*	किसान	Farmer
क्री (क्रीणाति)	*Krī (Krīṇāti)*	खरीदना	To buy
केनचित्	*Kēnacit*	किसी के द्वारा, किसी से (पुं०)	By someone (m.)
गम्यताम्	*Gamyatām*	जाइये	You may go
चिन्तयामि (चिन्त्)	*Cintayāmi (Cint)*	सोचता हूँ	I think, I believe
छात्रा	*Chātrā*	छात्रा	Girl-student
तडागः	*Taḍāgaḥ*	तालाब	Pool, lake, pond
तण्डुलः	*Taṇḍulaḥ*	चावल	Rice
तस्मिन् काले	*Tasmin Kālē*	उस समय	At that time
तावत्	*Tāvat*	तो फिर, तब तो	Then, therefore
तॄ (तरति)	*Tṝ (Tarati)*	तैरना	To swim
दर्शनम्	*Darśanam*	देखना, दर्शन	Seeing, sighting, coming accross
देवः	*Dēvaḥ*	देवता, भगवान्	God

देवालयः	*Dēvālayaḥ*	मन्दिर, प्रार्थना-स्थल	Temple
धारणम्	*Dhāraṇam*	पहनना	Wearing
धारयति (धृ)	*Dhārayati (Dhṛ)*	पहनता / ती है, धारण करता / ती है	He/she wears
निवत्स्यति (नि+वस्)	*Nivatsyati (Ni+Vas)*	रहेगा / गी	He/She will stay
नेत्रम्	*Nētram*	आँख	Eye
नेष्यथः (नी)	*Nēṣyathaḥ (Nī)*	ले जाओगे	(You two) will take
पक्व	*Pakva*	पक्का	Ripe
पच्	*Pac*	पकाना	To cook
पत्	*Pat*	गिरना	To fall
पतिता	*Patitā*	गिर गई, गिरी हुई	Fallen; has fallen
परश्वः	*Paraśvaḥ*	परसों	Day after tomorrow
प्रमाण-पत्रम्	*Pramāṇa-patram*	प्रमाण-पत्र	Certificate
पा (पिब)	*Pā (Piba)*	पीना	To drink
पचनम्	*Pacanam*	पकाना	Cooking
पादत्राणम्	*Pādatrāṇam*	जूता	Shoes
पुनः दर्शनाय	*Punaḥ darśanāya*	फिर मिलेंगे	See (you) again
पेटिका	*Pēṭikā*	थैली, बस्ता	Bag
भगिन्यौ	*Bhaginyau*	दो बहनें	Sisters (dual) .
भवतु	*Bhavatu*	अच्छा, खैर, ठीक	Ok, All right

भविष्यति (भू)	*Bhaviṣyati (Bhū)*	होगा / होगी	Will be
मन्ये (मन्)	*Manyē (Man)*	मैं मानता / मानती हूँ; मुझे विश्वास है	I think; I believe
मया सार्धम्	*Mayā sārdham*	मेरे साथ	With me
मयूरः	*Mayūraḥ*	मोर	Peacock
मह्यम् (अस्मद्)	*Mahyam (Asmad)*	मेरे लिए	For me
मेलिष्यावः (मिल्)	*Mēliṣyāvaḥ (Mil)*	हम (दोनों) मिलेंगे/गी	We (two) will meet
यद्	*Yad*	जो	That—which
यदि	*Yadi*	अगर	If
रात्रौ (रात्रि)	*Rātrau (Rātri)*	रात को	At night
राष्ट्रपतिः	*Rāṣṭrapatiḥ*	राष्ट्रपति	The President
लेखनी	*Lēkhanī*	कलम	Pen
विश्वविद्यालयः	*Viśvavidyālayaḥ*	विश्वविद्यालय	University
शीघ्रम्	*Śīghram*	जल्दी	Quickly, fast
शृणु (श्रु)	*Śṛṇu (Śru)*	सुनो	Listen
साधु	*Sādhu*	अच्छा, भला	All right
साधूक्तम्	*Sādhūktam*	ठीक कहा	Well-said
सार्धम्	*Sārdham*	साथ	together
सूर्यः	*Sūryaḥ*	सूरज	Sun
स्यात् (अस्)	*Syāt (As)*	हो सकता है कि .....; सम्भव है कि ....;	May be

त्रयोदशः पाठः पाठ तेरह
Trayodaśaḥ Pāṭhaḥ Lesson-13

अवकाश-समये। *Avakāśa-samayē.*
छुट्टी के समय। During Holidays.

गोविन्दः – मित्राणि, परश्वः अवकाशः भविष्यति। यूयम् तस्मिन् दिवसे किं करिष्यथ?

Gōvindaḥ – Mitrāṇi, paraśvaḥ avakāśaḥ bhaviṣyati. Yūyam tasmin divasē kiṁ kariṣyatha?

गोविन्द – मित्रो, परसों छुट्टी होगी। तुम लोग उस रोज क्या करोगे?

Govinda – Friends, the day after tomorrow will be holiday. What will you do on that day?

त्रीणि मित्राणि – गुरोः आदेशः अस्ति – यूयम् अवकाशे परीक्षायाः विषये विचारयिष्यथ सर्वपाठानाम् च अवलोकनं करिष्यथ इति।

Trīṇi Mitrāṇi – Gurōḥ ādēśaḥ asti-yūyam avakāśē parīkṣāyāḥ viṣayē vicārayiṣyatha sarva-pāṭhānām ca avalōkanaṁ kariṣyatha iti.

तीन मित्र – गुरु जी का आदेश है, 'तुम लोग छुट्टी के दिन परीक्षा के विषय में विचार करोगे और सभी पाठों की आवृत्ति करोगे।'

Three friends – The teacher's instruction is, 'You will all discuss about the examination during the holiday and revise all the lessons.'

सुमनः – भोः मित्राणि! सुष्ठूक्तम्। अस्माभिः एवमेव कर्तव्यम्।

Sumanaḥ – Bhōḥ mitrāṇi! Suṣṭhūktam. Asmābhiḥ ēvamēva kartavyam.

सुमन – हे मित्रो! बिलकुल ठीक कहा! हमें ऐसा ही करना चाहिए।

Sumana – Oh friends! Well said! We should indeed do like this!

अशोकः – मन्ये वयं सर्वे परश्वः आचार्यस्यावासं गमिष्यामः। तत्र आचार्यः यथा अस्मभ्यं कथयिष्यति अस्माभिः तथा कर्तव्यम्।

Aśōkaḥ – Manyē vayaṁ sarvē paraśvaḥ Ācāryasyāvāsaṁ gamiṣyāmaḥ. Tatra Ācāryaḥ yathā asmabhyaṁ kathayiṣyati asmābhiḥ tathā kartavyam.

अशोक – मैं सोचता हूँ कि परसों हम लोग आचार्य जी के घर जाएँगे। वहाँ पर आचार्य जी हमें जैसा बताएँगे हमें वैसा ही करना होगा।

Ashoka – I think that the day after tomorrow we will all go to the teacher's place. There as the teacher will tell us we will have to do accordingly.

सुरेन्द्रः – वयं एवमेव करिष्यामः। अन्ये छात्राः अपि यदा अस्मान् द्रक्ष्यन्ति तदा ते अपि सम्मेलिष्यन्ति, परीक्षाविषये च विचारयिष्यन्ति।

Surēndraḥ – *Vayaṁ ēvamēva kariṣyāmaḥ. Anyē chātrāḥ api yadā asmān drakṣyanti tadā tē api sammēliṣyanti, parīkṣāviṣayē ca vicārayiṣyanti.*

सुरेन्द्र – हम लोग ऐसा ही करेंगे। दूसरे छात्र भी जब हमें देखेंगे तो वे भी मिलेंगे और परीक्षा के विषय में विचार करेंगे।

Surendra – We will definitely do like this. When other students also will see us, they too will come together and discuss about the examination.

सुनीलः – परन्तु तस्मात् पूर्वम् अस्माभिः इदं द्रष्टव्यम् यत् वयं किं न अवगच्छामः किं च अस्माभिः अध्यापकः प्रष्टव्यः इति।

Sunīlaḥ – *Parantu tasmāt pūrvam asmābhiḥ idaṁ draṣṭavyam yat vayaṁ kiṁ na avagacchāmaḥ kiṁ ca asmābhiḥ adhyāpakaḥ praṣṭavyaḥ iti.*

सुनील – परन्तु उससे पहले हमें यह देखना है कि हमें क्या समझ में नहीं आ रहा है और अध्यापक से हमें क्या पूछना है।

Sunīla – But before this we have to find out what we don't understand and what we have to ask the teacher.

आलोकः – सत्यम् इदम्। आगम्यताम् सर्वैः। यूयम् सर्वे मम गृहम् आगमिष्यथ। तत्र वयं किंचित् खादिष्यामः पास्यामः च। तत्पश्चात् वयं पुस्तकानि द्रक्ष्यामः कांश्चित् प्रश्नान् च अवलोकयिष्यामः।

Ālōkaḥ – *Satyam idam. Āgamyatām sarvaiḥ. Yūyam sarvē mama gṛham agamiṣyatha. Tatra vayaṁ kiñcit khādiṣyāmaḥ, pāsyāmaḥ ca. Tatpaścāt vayaṁ pustakāni drakṣyāmaḥ kāṁścit praśnān ca avalōkayiṣyāmaḥ.*

आलोक – यह ठीक है। सभी लोग चलो। तुम लोग मेरे घर चलोगे। वहाँ हम लोग कुछ खाएँगे और पिएँगे। उसके बाद पुस्तकों को देखेंगे तथा कुछ प्रश्नों पर विचार करेंगे।

Aloka – That's true. Come on everybody. You will all come to my place. There we will have something to eat and drink. After that we will have a look at the books and discuss a few questions.

जगदीशः – अयि, सम्प्रति स्मरामि! मम अनुजायाः अपि परीक्षा अचिरमेव भविष्यति। अतः

अहं चिन्तयामि यत् प्रायशः सापि अस्माभिः सह आगमिष्यति पठिष्यति च इति।

Jagadīśaḥ – *Ayi, samprati smarāmi! Mama ānujāyāḥ api parīkṣā acirамēva bhaviṣyati. Ataḥ ahaṁ cintayāmi yat prāyaśaḥ sāpi asmābhiḥ saha āgamiṣyati paṭhiṣyati ca iti.*

जगदीश – अरे, मुझे अब याद आ रहा है! मेरी छोटी बहन की भी परीक्षा जल्द ही होने वाली है। इसलिए मैं सोचता हूँ कि शायद वह भी हमारे साथ आएगी और पढ़ेगी।

Jagadisha – Oh, now I remember! My younger sister's examination will also be held shortly. Therefore, I think that possibly she too will come with us and study.

राकेशः – तव अनुजा कस्याम् कक्षायाम् पठति?

Rākēśaḥ – *Tava anujā kasyām kakṣāyām paṭhati?*

राकेश – तुम्हारी छोटी बहन किस कक्षा में बढ़ती है?

Rakesha – In which class is your younger sister?

जगदीशः – सा दशम्यां कक्षायां पठति।

Jagadīśaḥ – *Sā daśamyāṁ kakṣāyāṁ paṭhati.*

जगदीश – वह दसवीं कक्षा में पढ़ती है।

Jagadisha – She studies in the tenth class.

दिनेशः – सा कया सह आगमिष्यति?

Dinēśaḥ – *Sā kayā saha āgamiṣyati?*

दिनेश – वह किसके साथ आएगी?

Dinesha – With whom will she come?

जगदीशः – सा अन्याभिः छात्राभिः सह आगमिष्यति। ताः सर्वाः स्व-स्व पुस्तकानि तथा अन्यां पाठ्य-सामग्रीम् अपि आनेष्यन्ति।

Jagadīśaḥ – *Sā anyābhiḥ chātrābhiḥ saha āgamiṣyati. Tāḥ sarvāḥ sva-sva pustakāni tathā anyāṁ pāṭhya-sāmagrīm api anēṣyanti.*

जगदीश – वह दूसरी छात्राओं के साथ आएगी। वे सब अपने साथ अपनी-अपनी पुस्तकें तथा दूसरी पाठ्य-सामग्री भी लाएँगी।

Jagadisha – She will come with other girl-students. They will all bring along with them their respective books and other reading material.

सर्वे – अलम् विलम्बेन। आगम्यताम्। वयं अधुनैव किंचित् विचारयिष्यामः।

Sarvē – *Alam vilambēna. Āgamyatām. Vayaṁ adhunaiva kiñcit vicārayiṣyāmaḥ.*

सभी – देर मत करो। आओ, हम लोग अभी ही कुछ विचार करेंगे।

Everyone – Let's not delay. Come on! We will discuss something right now.

त्रयोदशः पाठः

पाठ तेरह

Trayodaśaḥ Pāṭhaḥ

Lesson-13

अभ्यास-कार्याणि

(Abhyāsa-kāryāṇi)

अभ्यास-कार्य

(Exercises)

1. (अ) स्मरण कीजिए :- **Remember :—**

(क) भू **(To be)** (लृट्लकारः) **Bhū (Lṛṭlakāraḥ)** (भविष्यत् काल) **(Future Tense)**

भविष्यति *Bhaviṣyati*	भविष्यतः *Bhaviṣyataḥ*	भविष्यन्ति *Bhaviṣyanti*
भविष्यसि *Bhaviṣyasi*	भविष्यथः *Bhaviṣyathaḥ*	भविष्यथ *Bhaviṣyatha*
भविष्यामि *Bhaviṣyāmi*	भविष्यावः *Bhaviṣyāvaḥ*	भविष्यामः *Bhaviṣyāmaḥ*

(ख) कृ **(To do)** (लृट्लकारः) **Kṛ (Lṛṭlakāraḥ)** (भविष्यत् काल) **(Future Tense)**

करिष्यति *Kariṣyati*	करिष्यतः *Kariṣyataḥ*	करिष्यन्ति *Kariṣyanti*
करिष्यसि *Kariṣyasi*	करिष्यथः *Kariṣyathaḥ*	करिष्यथ *Kariṣyatha*
करिष्यामि *Kariṣyāmi*	करिष्यावः *Kariṣyāvaḥ*	करिष्यामः *Kariṣyāmaḥ*

(आ) निम्नलिखित धातुओं के रूप लट्लकार तथा लृट्लकार में लिखिए :-
Conjugate the following verbs in Present Tense and Future Tense :-

पत्, वद्, पठ्, गम्, स्था, चल्, दृश्।
Pat, Vad, Paṭh, Gam, Sthā, Cal, Dṛś

2. **रिक्त स्थानों में उचित शब्द चुनकर लिखिए :-**
Choose the proper words and fill in the blanks :–

तस्मिन्, एकस्मिन्, अस्मिन्, एतस्मिन्, कस्मिन्।
Tasmin, Ēkasmin, Asmin, Ētasmin, Kasmin.

उदाहरण :- अहं *तस्मिन्* नगरे निवसामि। (तद्)
Example :- *Ahaṁ tasmin nagarē nivasāmi. (Tad)*

(1) त्वम्............................ग्रामे निवससि? (किम्)
Tvam.........................grāmē nivasasi? (Kim)

(2) ....विद्यालये कति छात्राः सन्ति? (एतद्)
.......................vidyālayē kati chātrāḥ santi? (Ētad)

(3) ....देशे अनेके सुन्दराः खगाः सन्ति। (इदम्)
.......................dēśē anēkē sundarāḥ khagāḥ santi. (Idam)

(4) ....वृक्षे खगाः स्व-नीडानि रचयन्ति। (तद्)
...................vṛkṣē khagāḥ sva-nīḍāni racayanti. (Tad)

(5) ....गृहे एकः सर्पः दृष्टः। (एक)
.... gṛhē ēkaḥ sarpaḥ dṛṣṭaḥ (Ēka)

3. **रिक्त स्थानों में उचित शब्द चुनकर लिखिए :-**
Choose the correct words and fill in the blanks :-

परीक्षायाः, अम्बायाः, अस्याः, तस्याः, वाटिकायाः, कस्याः, लतायाः।
Parīkṣāyāḥ, Ambāyāḥ, Asyāḥ, Tasyāḥ, Vāṭikāyāḥ, Kasyāḥ, Latāyāḥ.

उदाहरण :- वयं सायंकाले **परीक्षायाः** विषये विचारयिष्यामः। **(परीक्षा)**
Example :-*Vayaṁ sāyaṁkālē* ***parīkṣāyāḥ*** *viṣayē vicārayiṣyāmaḥ* **(Parīkṣā)**

(1) ....साहाय्यं का करिष्यति? (अम्बा)
.......................sāhāyyaṁ kā kariṣyati? (Ambā)

(2) ....कक्षायाः बालिकाः पुष्प-लतां वपन्ति। (तद्)
.......................kakṣāyāḥ bālikāḥ puṣpa-latāṁ vapanti. (Tad)

(3) ....गृहम् तत्र अस्ति। (लता)
......................gṛhaṁ tatra asti. (Latā)

(4) ते तस्याः.............सौन्दर्यम् पश्यन्ति। (वाटिका)
Tē tasyāḥ.........saundryaṁ paśyanti. (Vāṭikā)

(5) ....बालायाः पुस्तकम् अत्र अस्ति? (किम्)
.......................bālāyāḥ pustakam atra asti? (Kim)

(6) ....बालिकायाः जनकः आगच्छति। (इदम्)
..........................bālikāyāḥ janakaḥ āgacchati. (Idam)

(7) ....दिवसे अहं न किंचित् पठिष्यामि। (परीक्षा)
..........................divasē ahaṁ na kiñcit paṭhiṣyāmi. (Parīkṣā)

(8) ....अनुजा तत्र गीतं गास्यति? (किम्)
....................................anujā tatra gītaṁ gāsyati? (Kim)

4. 'यदा-तदा' से रिक्त स्थानों की पूर्ति कीजिए :-

Fill in the blanks with the pair of words *'Yadā-Tadā'* :-

उदाहरणः- सः यदा आगमिष्यति तदा एव अहं गमिष्यामि।

Example:- *Saḥ **yadā** āgamiṣyati **tadā** ēva ahaṁ gamiṣyāmi.*

(1) .... अवकाशः भविष्यति .... सः आगमिष्यति।
.... *avakāśaḥ bhaviṣyati* ....*saḥ āgamiṣyati.*

(2) .... अध्यापकः पाठयति ....वयं तूष्णीं भवामः।
...............*adhyāpakaḥ pāṭhayati* ....*vayaṁ tūṣṇīṁ bhavāmaḥ.*

(3) ....त्वं वदिष्यसि ....ते कार्यं करिष्यन्ति।
.... *tvaṁ vadiṣyasi* ....*tē kāryaṁ kariṣyanti.*

(4) .... उत्सवः भवति ....विद्यालये अध्यापनं न भवति।
.... *utsavaḥ bhavati* ....*vidyālayē adhyāpanaṁ na bhavati.*

(5) ....तव जन्म-दिवसः भविष्यति ....अहं तुभ्यं पुस्तकमेकं दास्यामि।
................*tava janma-divasaḥ bhaviṣyati* ....*ahaṁ tubhyaṁ pustakamēkaṁ dāsyāmi.*

(6) ....जननी पूजनं करिष्यति ....किं त्वं गृहे न भविष्यसि?
..............*jananī pūjanaṁ kariṣyati* ....*kiṁ tvaṁ gṛhē na bhaviṣyasi?*

5. (अ) सन्धि कीजिए :-

Join the following words :-

गुरु + उपदेशः = ...
Guru + *upadēśaḥ* = ...
साधु + उक्तम् = ...
Sādhu + *uktam* = ...
सुष्ठु + उक्तम् = ...
Suṣṭhu + *uktam* = ...

साधु + उपदेशः = ...

Sādhu + *upaēśaḥ* = ...

वधू + उत्सवः = ...

Vadhū + *utsavaḥ* = ...

मनु + उक्तिः = ...

Manu + *uktiḥ* = ...

(आ) सन्धिच्छेद कीजिए :-

Disjoin the following words :-

विष्णूपासना .... + ...

Viṣṇūpāsanā .... + ...

सिन्धूर्मिः .... + ...

Sindhūrmiḥ .... + ...

भानूदयः .... + ...

Bhānūdayaḥ .... + ...

साधूचितम् .... + ...

Sādhūcitam .... + ...

सरयूत्तरम् .... + ...

Sarayūttaram .... + ...

मृत्यूपायः .... + ...

Mṛtyūpāyaḥ .... + ...

6. उचित शब्द चुनकर रिक्त स्थानों की पूर्ति कीजिए :-

Choose the correct words and fill in the blanks :-

तेन, तैः, जनकेन, अन्याभिः, कया, ताभिः, बालिकया।

Tēna, Taiḥ, Janakēna, Anyābhiḥ, Kayā, Tābhiḥ, Bālikayā.

उदाहरण - रामः तेन सह वनं गच्छति।

Example : *Rāmaḥ tēna saha vanaṁ gacchati.*

(1) उमा ....छात्राभिः सह नर्तिष्यति।

Umā .... chātrābhiḥ saha nartiṣyati.

(2) वयं ....बालकैः सह गमिष्यामः।

Vayaṁ ....bālakaiḥ saha gamiṣyāmaḥ.

(3) अम्बा ....स्त्रीभिः सह देवालये अस्ति।
Ambā ....strībhiḥ saha dēvālayē asti.

(4) मम अध्यापकः तस्य ....सह तत्र पाठयति।
Mama adhyāpakaḥ tasya ....saha tatra pāṭhayati.

(5) तव अनुजा ....बालिकया सह आगमिष्यति?
Tava anujā.......................bālikayā saha āgamiṣyati?

(6) उषा तया ....सह क्रीडिष्यति।
Uṣā tayā ....saha krīḍiṣyati.

7. **रिक्त स्थानों को कोष्ठक में दिये गये धातुओं के उचित रूप से भरिए :-**
Fill in the blanks with the correct forms of the verbs given in brackets :-

(1) यदा अहम् आगमिष्यामि तदा अहं पुस्तकम् ....। (आनी)
Yadā aham āgamiṣyāmi tadā ahaṁ pustakam.................... (Ā-nī)

(2) श्वः सः विद्यालये संस्कृतं पठितुम्...........................। (आगम्)
Śvaḥ saḥ vidyālayē Saṁskṛtaṁ paṭhitum......................(Āgam)

(3) तत्र कः ....? (क्रीड्) किं सः तव अनुजः ....? (अस्)
Tatra kaḥ................? (Krīḍ) kiṁ saḥ tava anujaḥ..............? (As)

(4) जनकः तुभ्यं पादत्राणम्....................। (दा)
Janakaḥ tubhyaṁ pādatrāṇam..................(Dā)

(5) मम मित्राणि परश्वः अत्र...........................। (धाव्)
Mama mitrāṇi paraśvaḥ atra......................(Dhāv)

(6) वयम् अस्मिन् नगरे ....। (निवस्)
Vayam asmin nagarē.................. (Nivas)

8. **कोष्ठक में दिये गये शब्दों के उचित रूप लिखिए :-**
Write down the proper forms of the words given in brackets :-

उदाहरण- अहम् अम्बायै एकं फलं नयामि। (अम्बा)
Example :- *Aham ambāyai ēkaṁ phalaṁ nayāmi. (Ambā)*

(1) सुषमा ....इदं पुस्तकं दास्यति। (लता)
Suṣamā......................idaṁ pustakaṁ dāsyati. (Latā)

(2) अम्बा ....दुग्धम् यच्छति। (बालिका)
Ambā ....dugdhaṁ yacchati. (Bālikā)

(3) सम्प्रति सर्वे छात्राः ....पठन्ति। (परीक्षा)
Samprati sarvē chātrāḥ ....paṭhanti. (Parīkṣā)
(4) किं जनकः ....वस्त्राणि आनेष्यति? (अनुजा)
Kiṁ janakaḥ.........................vastrāṇi ānēṣyati? (Anujā)
(5) त्वं ....परीक्षायै पठसि? (किम्)
Tvaṁ...........................parīkṣāyai paṭhasi? (Kim)
(6) विनीता ....अध्यापिकायै पुष्पं नयति। (तद्)
Vinīta ....adhyāpikāyai puṣpaṁ nayati. (Tad)

9. संस्कृत में अनुवाद कीजिए :-

(1) मैं तुमको एक पुस्तक दूँगा।
(2) तुम किसके लिए फल लाओगे?
(3) हम माताजी को ये फूल देंगे।
(4) उन लड़कियों का अध्यापक कौन है?
(5) मेरी पाठशाला यहाँ पास में ही है।
(6) तेरी पाठशाला का नाम क्या है?
(7) बच्चो, तुम लोग कक्षा में क्या पढ़ते हो?
(8) सुरेश का छोटा भाई पानी पी रहा है।
(9) कौन लड़की उस आदमी के बगीचे में जाएगी और कुछ फूल ले आएगी?
(10) वह लड़का जब चाहता है तब यहाँ आता है।

Translate into Sansrit : –

(1) I'll give you a book.
(2) For whom will you bring fruit?
(3) We will give these flowers to mother.
(4) Who is the teacher of those girls?
(5) My school is here nearby.
(6) What's the name of your school?
(7) Children, what do you study in class?
(8) Suresha's youner brother is drinking water.
(9) Which girl will go to that man's garden and bring some flowers?
(10) That boy comes here whenever he likes.

⁂

त्रयोदशः पाठः
Trayodaśaḥ Pāṭhaḥ

पाठ तेरह
Lesson-13

शब्दकोशः (*Śabda-kośaḥ* : Vocabulary)

अचिरमेव	Acirамēva	जल्दी ही	Soon, shortly, quickly
अधुना	*Adhunā*	अभी	Now
अन्ये	*Anyē*	और लोग, दूसरे लोग	Other people
अयि !	*Ayi* !	अरे !	O, Oh !
अलम् विलम्बेन	*Alam vilambēna*	देर न करें	Do not delay
अवलोकनम्	*Avalōkanam*	देखना	Seeing
आगम्यताम्	*Āgamyatām*	आइये	Please come
आचरितव्यम्	*Ācaritavydm*	करना चाहिए	Should observe
आवासः	*Āvāsaḥ*	रहने की जगह	Residence
उत्तरम्	*Uttaram*	दूसरी तरफ, उस पार	On the other bank/ side
उपदेशः	*Upadēśaḥ*	शिक्षा	Preaching, lecture, advice
उपायः	*Upāyaḥ*	तरकीब, हल, समाधान	Means, way, solution
उपासना	*Upāsanā*	पूजा	Worship
ऊर्मिः	*Ūrmiḥ*	तरंग, लहर	Wave

कथय्	*Kathay*	कहना	To say, to tell
कर्तव्यम्	*Kartavyam*	करना चाहिए; फर्ज़	Should be done; duty
कस्यै (किम्)	*Kasyai (Kim)*	किसके लिए (स्त्री०)	For whom (f.)
गुरुः	*Guruḥ*	शिक्षक, अध्यापक	Teacher, preceptor
चल्	*Cal*	चलना	To walk, to move
जन्म-दिवसः	*Janma-divasaḥ*	जन्म-दिन	Birthday.
तस्मात् (तद्)	*Tasmāt (Tad)*	उससे (अलग)	From that
तूष्णीम्	*Tūṣṇīm*	चुप, चुपचाप	Quiet, silent
द्रष्टव्यम् (दृश्)	*Draṣṭavyam (Dṛś)*	देखना चाहिए, देखने योग्य	Should see/to be seen
दृष्टः (दृश्)	*Dṛṣṭaḥ (Dṛś)*	दिखाई दिया, देखा	Seen/was seen (m.)
धाव्	*Dhāv*	दौड़ना	To run
नीडः	*Nīḍaḥ*	घोंसला	Nest
पूर्वम्	*Pūrvam*	पहले	Before
प्रष्टव्यम् (प्रच्छ्)	*Praṣṭavyam (Pracch)*	पूछना चाहिए; पूछने लायक	Should ask; to be asked
प्रायशः	*Prāyaśaḥ*	शायद	Probably, possibly
भानुः	*Bhānuḥ*	सूरज	*Sun*
मेलिष्यन्ति (मिल्)	*Mēliṣyanti (Mil)*	मिलेंगे / गी	Will meet (Pl.)
मृत्युः	*Mṛtyuḥ*	मौत	Death
यथा.....तथा	*Yathā.......Tathā*	जैसा......तैसा, वैसा	As.....so

यदा.......तदा	*Yadā......tadā*	जब.......तब	When.....then
रच्	*Rac*	बनाना	To draw, to create
वधूः	*Vadhūḥ*	दुलहिन, पत्नी, पुत्र–वधु	Bride; wife; daughter-in law
वप्	*Vap*	बोना	To sow, to plant, to scatter
विचारय्	*Vicāray*	विचार करना, सोचना	To discuss, to think
विलम्बः	*Vilambaḥ*	देर	late, delay
सत्यम्	*Satyam*	सच	Truth, right
सम्+मिल्	*Sam+mil*	इकट्ठा होना, मिलना	To assemble, to come together
सर्पः	*Sarpaḥ*	साँप	snake
सरयू	*Sarayū*	एक नदी का नाम	Name of a river
सिन्धुः	*Sindhuḥ*	एक नदी का नाम	Name of a river; river in general
सुष्ठु	*Suṣṭhu*	ठीक	Correct, right
सौन्दर्यम्	*Saundaryam*	सुन्दरता	Beauty
स्त्री	*Strī*	औरत	Woman

⁂ ⁂ ⁂

चतुर्दशः पाठः
Caturdaśaḥ Pāṭhaḥ

पाठ चौदह
Lesson-14

चित्रकारः। *Citrakāraḥ.*
चित्रकार। The Artist.

धीरेन्द्रः – सुरेन्द्र, त्वं कस्मै इमानि चित्राणि रचयसि?

Dhīrēndraḥ – *Surēndra, tvaṁ kasmai imāni citrāṇi racayasi?*

धीरेन्द्र – सुरेन्द्र, तुम किसके लिए ये चित्र बना रहे हो?

Dhirendra – Surendra, for whom are you drawing these pictures?

सुरेन्द्रः – भ्रातः, अहम् एतानि चित्राणि अस्माकम् राष्ट्रपतये रचयामि। अहं श्वः तस्य महोदयस्यावासं गमिष्यामि तस्मै च इमानि चित्राणि प्रदास्यामि। किं त्वम् तम् राष्ट्रपति-महाभागं जानासि?

Surēndraḥ – *Bhrātaḥ, aham ētāni citrāṇi asmākaṁ Rāṣṭrapatayē racayāmi. Ahaṁ śvaḥ tasya mahōdayasyāvāsaṁ gamiṣyāmi tasmai ca imāni citrāṇi pradāsyāmi. Kiṁ tvam tam Rāṣṭrapati-mahābhāgaṁ jānāsi?*

सुरेन्द्र – भाई, मैं ये चित्र अपने राष्ट्रपति के लिए बना रहा हूँ। कल मैं उन महामहिम जी के निवास स्थान पर जाऊँगा और उन्हें यह भेंट करूँगा। क्या तुम उन राष्ट्रपति महोदय को जानते हो?

Surendra – Brother, I am drawing these pictures for our President. Tomorrow I'll be going to His Excellency's Residence and present these to him. Do you know His Excellency, the President?

धीरेन्द्रः – अथ किम्? कः तं न जानाति? अतीव सुन्दराणि इमानि चित्राणि। किं त्वम् आवयोः चित्रे अपि रचयिष्यसि? इयमस्ति आवयोः प्रार्थना।

Dhīrēndraḥ – *Atha kim? Kaḥ taṁ na jānāti? Atīva sundarāṇi imāni citrāṇi. Kiṁ tvam āvayōḥ citrē api racayiṣyasi? Iyamasti āvayōḥ prārthanā.*

धीरेन्द्र – और क्या? उन्हें कौन नहीं जानता? ये चित्र बहुत ही सुन्दर हैं। क्या तुम हम दोनों के चित्र भी बनाओगे? यह हम दोनों का आग्रह है।

Dhirendra – Why not? Who does not know him? These pictures are beautiful indeed. Will you draw the pictures of the two of us also? This is our request.

सुरेन्द्रः – कथं न रचयिष्यामि मित्र? अवश्यम् अहं युवयोः अपि चित्रे रचयिष्यामि।

Surēndraḥ – *Kathaṁ na racayiṣyāmi mitra? Avaśyam ahaṁ yuvayōḥ api citrē racayiṣyāmi.*

सुरेन्द्र – मैं क्यों नहीं बनाऊँगा मित्र? मैं अवश्य ही तुम दोनों के भी चित्र बनाऊँगा।

Surendra – Friend, why won't I draw? I will certainly draw the pictures of the two of you also.

त्रयः बालाः – भ्रातः, किं भवान् अस्माकमपि चित्राणि रचयिष्यति?

Trayaḥ Bālāḥ – *Bhrātaḥ, kiṁ bhavān asmākamapi citrāṇi racayiṣyati?*

तीन लड़के – भैया, क्या आप हम सबके भी चित्र बनाओगे?

Three boys – Brother, will you draw the pictures of all of us also?

सुरेन्द्रः – वत्साः, अहं न केवलम् एतयोः मित्रयोः चित्रे रचयिष्यामि, अपितु युष्माकम् सर्वेषाम् अपि चित्राणि रचयिष्यामि। नायं चिन्ताविषयः।

Surēndraḥ – *Vatsāḥ, ahaṁ na kēvalam ētayōḥ mitrayōḥ citrē racayiṣyāmi, apitu yuṣmākam sarvēṣām api citrāṇi racayiṣyāmi. Nāyaṁ cintāviṣayaḥ.*

सुरेन्द्र – बच्चो, मैं न केवल इन दोनों मित्रों के चित्र बनाऊँगा, बल्कि तुम सबके भी चित्र बनाऊँगा। चिन्ता मत करो!

Surendra – Boys, I will draw the pictures of not only these two friends, but those of all of you as well. Don't you worry.

बालाः – परन्तु भवान् कदा रचयिष्यति? किम् अद्यैव?

Bālāḥ – *Parantu bhavān kadā racayiṣyati? Kim adyaiva?*

बच्चे – पर आप कब बनाएँगे? क्या आज ही?

The boys – But when will you draw? Today itself?

सुरेन्द्रः – नहि नहि, अद्य तु चिरं संजातम्। यूयम् अन्यस्मिन् दिवसे पुनः यदागमिष्यथ तदेदृशम् चित्रं युष्माकमपि रचयिष्यामि। किं युष्माभिः अवगतम्?

Surēndraḥ – *Nahi nahi, adya tu ciraṁ sañjātam. Yūyam anyasmin divasē punaḥ yadāgamiṣyatha tadēdṛśaṁ citraṁ yuṣmākamapi racayiṣyāmi. Kiṁ yuṣmābhiḥ avagatam?*

सुरेन्द्र – नहीं नहीं ! आज तो देर हो चुकी है। दूसरे दिन जब तुम लोग फिर आओगे तब मैं इस प्रकार के चित्र तुम लोगों के लिए भी बनाऊँगा। क्या तुम समझ गए?

Surendra – No, no! Today it's already late. When you will come again some other day then I will draw similar pictures for all of you also. Have you understood?

बालाः – नूनम् अवगतम् अस्माभिः। अनुगृहीताः स्मः। अस्तु। गम्यते सम्प्रति। पुनः आगमिष्यामः। नमस्ते।

Bālāḥ – *Nūnam avagatam asmābhiḥ. Anugṛhītāḥ smaḥ. Astu. Gamyatē samprati. Punaḥ āgamiṣyāmaḥ. Namastē.*

बच्चे – बिलकुल समझ गए। हम आभारी हैं। अच्छा ! अब हम चलते हैं। फिर आएँगे। नमस्ते !

The boys – Sure, we have understood! We are grateful. All right! We are taking leave now. We will come again. Good-bye.

रमेशः – मित्र, किं त्वं सूर्योदयस्य, पुष्पोपवनस्य अथवा मृगेन्द्रादीनामपि चित्राणि न रचयसि?

Ramēṣaḥ – *Mitra, Kiṁ tvaṁ sūryōdayasya, puṣpōpavanasya athavā mṛgēndrādīnāmapi citrāṇi na racayasi?*

रमेश – मित्र, क्या तुम सूर्योदय, बाग–बगीचे, शेरादि के चित्र भी नहीं बनाते हो?

Ramesha – Friend, don't you draw the pictures of sunrise, flower-gardens, lions, etc., also?

सुरेन्द्रः – अहं शनैः शनैः एतेषां सर्वेषामपि चित्राणि रचयिष्यामि। सम्प्रति इदं पश्य। अस्मिन् चित्रे गोपेन्द्रः कृष्णः दृश्यते। अर्जुनं प्रति तस्योपदेशम् अपि अत्र लेखिष्यामि।

Surēndraḥ – *Ahaṁ śanaiḥ śanaiḥ ētēṣāṁ sarvēṣāmapi citrāṇi racayiṣyāmi. Samprati idaṁ paśya. Asmin citrē Gōpendraḥ Śrī Kṛṣṇaḥ dṛśyatē. Arjunaṁ prati tasyōpadēśam api atra lēkhiṣyāmi.*

सुरेन्द्र – मैं धीरे–धीरे इन सबके भी चित्र बनाऊँगा। इस समय तुम यह देखो। इस चित्र में गोपेन्द्र श्री कृष्ण दिखाई दे रहे हैं। अर्जुन के प्रति उनके उपदेश को भी मैं यहाँ लिखूँगा।

Surendra – Little by little I will draw the pictures of all these as well. At present look at this. In this picture Shri Krishna, the Lord of the Gopas can be seen. I will write here His message to Arjuna also.

रमेशः – अर्जुनं प्रति श्रीकृष्णस्योपदेशः कः अस्ति?

Ramēṣaḥ – *Arjunaṁ prati Śrīkṛṣṇasyōpadēśaḥ kaḥ asti?*

रमेश – अर्जुन के प्रति श्रीकृष्ण का क्या उपदेश है?

Ramesha – What is Lord Krishna's message to Arjuna?

सुरेन्द्रः – भगवतः श्रीकृष्णस्य वचनम् एवमस्ति–
यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।। इति।।

Surēndraḥ – *Bhagavataḥ Śrīkṛṣṇasya vacanam ēvamasti:*
Yadā yadā hi dharmasya glānirbhavati Bhārata;
abhyutthānamadharmasya tadātmānaṁ sṛjāmyaham. Iti.

सुरेन्द्र – भगवान् कृष्ण का उपदेश इस प्रकार है – हे अर्जुन, जब–जब धर्म का ह्रास होता है, तथा अधर्म बढ़ जाता है, तब तब मैं अपने को प्रकट करता हूँ।

Surendra – Lord Krishna's message is as follows :–
Oh Arjuna, whenever there is a decline in Dharma and a rise in Adharma, then I manifest Myself.

रमेशः – साधु मित्र! सम्प्रति गच्छामि। पुनर्दर्शनाय!

Ramēṣaḥ – *Sādhu mitra! Samprati gacchāmi. Punar-darśanāya!*

रमेश – ठीक है मित्र! अब मैं चलता हूँ। फिर मिलेंगे!

Ramesha – All right friend! I'm taking leave now. See you again.

सुरेन्द्रः – अस्तु! नमस्ते!

Surēndraḥ – *Astu! Namastē!*

सुरेन्द्र – ठीक है! नमस्ते!

Surendra – All right! Good-bye.

* * *

चतुर्दशः पाठः
Caturdaśaḥ Pāṭhaḥ

पाठ चौदह
Lesson-14

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

1. **स्मरण कीजिए — पुंल्लिंगम् — बाल**
Remember — Pumliṅgam — Bāla

विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam*	द्विवचनम् *Dvivacanam*	बहुवचनम् *Bahuvacanam*
प्रथमा Prathamā	बालः *Bālaḥ*	बालौ *Bālau*	बालाः *Bālāḥ*
द्वितीया Dvitīya	बालम् *Bālam*	बालौ *Bālau*	बालान् *Bālān*
तृतीया Tṛtīya	बालेन *Bālēna*	बालाभ्याम् *Bālābhyām*	बालैः *Bālaiḥ*
चतुर्थी Caturthī	बालाय *Bālāya*	बालाभ्याम् *Bālābhyām*	बालेभ्यः *Bālēbhyaḥ*
पञ्चमी Pañcamī	बालात् *Bālāt*	बालाभ्याम् *Bālābhyām*	बालेभ्यः *Bālēbhyaḥ*

षष्ठी Ṣaṣṭhī	बालस्य *Bālasya*	बालयोः *Bālayōḥ*	बालानाम् *Bālānām*
सप्तमी Saptamī	बाले *Bālē*	बालयोः *Bālayōḥ*	बालेषु *Bālēṣu*
सम्बोधनम् Sambodhanam	हे बाल! *Hē Bāla!*	हे बालौ! *Hē Bālau!*	हे बालाः! *Hē Bālāḥ!*

1. **(B) इन शब्दों के रूप आठों विभक्तियों में लिखिये :-**

Decline the following words in all the 8 cases :-

खग, विद्यालय, जनक, बालक, सेवक।

Khaga, Vidyālaya, Janaka, Bālaka, Sēvaka.

2. **स्मरण कीजिए — स्त्रीलिंगम् — लता**

Remember — *Strīliṅgam* — *Latā*

विभक्ति ***Vibhakti***	एकवचनम् ***Ēkavacanam***	द्विवचनम् ***Dvivacanam***	बहुवचनम् ***Bahuvacanam***
प्रथमा Prathamā	लता *Latā*	लते *Latē*	लताः *Latāḥ*
द्वितीया Dvitīya	लताम् *Latām*	लते *Latē*	लताः *Latāḥ*
तृतीया Tṛtīya	लतया *Latayā*	लताभ्याम् *Latābhyām*	लताभिः *Latābhiḥ*
चतुर्थी Caturthī	लतायै *Latāyai*	लताभ्याम् *Latābhyām*	लताभ्यः *Latābhyaḥ*
पञ्चमी Pañcamī	लतायाः *Latāyāḥ*	लताभ्याम् *Latābhyām*	लताभ्यः *Latābhayaḥ*

षष्ठी Ṣaṣṭhī	लतायाः *Latāyāḥ*	लतयोः *Latayōḥ*	लतानाम् *Latānām*
सप्तमी Saptamī	लतायाम् *Latāyām*	लतयोः *Latayōḥ*	लतासु *Latāsu*
सम्बोधनम् Sambodhanam	हे लते! *Hē Latē!*	हे लते! *Hē Latē!*	हे लताः! *Hē Latāḥ!*

2. **(B) इन शब्दों के रूप आठों विभक्तियों में लिखिये :-**

Decline the following words in all the 8 cases :-

अम्बा, बालिका, बाला, वाटिका, अनुजा।

Ambā, bālikā, bālā, vāṭikā, anujā.

3. **स्मरण कीजिए — नपुंसकलिंगम् — फल**

Remember — *Napuṁsakaliṅgam* (Neuter) — Phala

विभक्ति ***Vibhakti***	एकवचनम् ***Ēkavacanam***	द्विवचनम् ***Dvivacanam***	बहुवचनम् ***Bahuvacanam***
प्रथमा Prathamā	फलम् *Phalam*	फले *Phalē*	फलानि *Phalāni*
द्वितीया Dvitīya	फलम् *Phalam*	फले *Phalē*	फलानि *Phalāni*
तृतीया Tṛtīya	फलेन *Phalēna*	फलाभ्याम् *Phalābhyām*	फलैः *Phalaiḥ*
चतुर्थी Caturthī	फलाय *Phalāya*	फलाभ्याम् *Phalābhyām*	फलेभ्यः *Phalēbhyaḥ*
पञ्चमी Pañcamī	फलात् *Phalāt*	फलाभ्याम् *Phalābhyām*	फलेभ्यः *Phalēbhyaḥ*

Note : The 8th case singular form of Ambā is "Amba!" not "Ambē!"

षष्ठी Ṣaṣṭhī	फलस्य *Phalasya*	फलयोः *Phalayōḥ*	फलानाम् *Phalānām*
सप्तमी Saptamī	फले *Phalē*	फलयोः *Phalayoḥ*	फलेषु *Phalesu*
सम्बोधनम् Sambodhanam	हे फल! *Hē Phala!*	हे फले! *Hē Phalē!*	हे फलानि! *Hē Phalāni!*

3. **(B) इन शब्दों के रूप आठों विभक्तियों में लिखिए :-**

Decline the following words in all the 8 cases :-

धनम्, पत्रम्, गृहम्, नगरम्, पुष्पम्।

Dhanam, Patram, Gṛham, Nagaram, Puṣpam.

4. **कोष्ठक में दिये गये शब्दों के उचित रूप से प्रश्नों के उत्तर दीजिए :-**

Answer the questions with the appropriate forms of the words given in brackets :-

उदाहरण- इदं कस्य पुस्तकम् अस्ति? (भरत)
इदं भरतस्य पुस्तकम् अस्ति।

Example:- *Idaṁ kasya pustakam asti? (Bharata)*
Idaṁ Bharatasya pustakam asti.

(1) त्वं कस्मै फलं दास्यसि? (तद्)
Tvaṁ kasmai phalaṁ dāsyasi? *(Tad)*

(2) जनकः कस्य वस्त्रम् आनयति? (अग्रज)
Janakaḥ kasya vastram ānayati? *(Agraja)*

(3) एतानि केषां पुस्तकानि सन्ति? (एतद्)
Ētāni kēṣāṁ pustakāni santi? *(Ētad)*

(4) यूयम् कस्मिन् विद्यालये पठथ? (इदम्)
Yūyam kasmin vidyālayē paṭhatha? *(Idam)*

(5) किं युवयोः गृहं दूरे अस्ति? (अस्मद्)
Kiṁ yuvayōḥ gṛhaṁ dūrē asti? (Asmad)

(6) किं युष्माकम् अनुजः अत्रैव पठति? (अस्मद्)
Kiṁ yuṣmākam anujaḥ atraiva paṭhati? (Asmad)

(7) किम् अस्माकम् अध्यापकः अद्य नागमिष्यति? (युष्मद्)
Kim asmākam adhyāpakaḥ adya nāgamiṣyati? (Yuṣmad)

(8) तव जननी सम्प्रति कुत्र अस्ति? (गृहम्)
Tava jananī samprati kutra asti? (Gṛham)

(9) सः कस्याः भोजनम् आनेष्यति? (अनुजा)
Saḥ kasyāḥ bhōjanam ānēṣyati? (Anujā)

(10) बालकाः सम्प्रति कुत्र सन्ति? (कक्षा)
Bālakāḥ samprati kutra santi? (Kakṣā)

5. उचित शब्द चुनकर रिक्त स्थानों की पूर्ति कीजिए :-

Choose the proper words and fill in the blanks :-

युष्माकम् , तस्मिन् , सा, गृहे, तयोः, तानि, वनात् , कुत्र, मित्रम् , वृक्षेभ्यः।
Yuṣmākam, Tasmin, Sā, Gṛhē, Tayōḥ, Tāni, Vanāt, Kutra, Mitram, Vṛkṣēbhyaḥ.

(1) ....चित्राणि सुन्दराणि सन्ति।
..............................*citrāṇi sundarāṇi santi.*

(2) मम.......................अस्मिन् नगरे पठति।
Mama.......................asmin nagarē paṭhati.

(3) सः खगः ....वृक्षे नीडं रचयति।
Saḥ khagaḥ..........................vṛkṣē nīḍaṁ racayati.

(4) सीता.........................पुष्पम् आनयति।
Sītā..............................puṣpam ānayati.

(5) ....शुष्काणि पत्राणि पतन्ति।
................................*śuṣkāṇi patrāṇi patanti.*

(6) मम..........................सप्त जनाः सन्ति।
Mama..........................sapta janāḥ santi.

(7) युष्माकं विद्यालयः ....वर्तते?

Yuṣmākaṁ vidyālayaḥ...................vartatē?

(8) ....बालिका तत्र नृत्यति।

.........................bālikā tatra nṛtyati.

(9) ....बालयोः अम्बा आगच्छति।

...............................bālayōḥ ambā āgacchati.

(10) ....नगरे कति विद्यालयाः सन्ति?

..............................nagarē kati vidyālayāḥ santi?

6. (अ) सन्धि कीजिए - Join the following words :-

(1) राजा + इन्द्रः = ...

Rājā + indraḥ = ...

(2) गज + इन्द्रः = ...

Gaja + indraḥ = ...

(3) रमा + ईशः = ...

Ramā + īśaḥ = ...

(4) दिन + ईशः = ...

Dina + īśaḥ = ...

(5) उष्ण + उदकम् = ...

Uṣṇa + udakam= ....

(6) मम + इदम् = ...

Mama + idam = ...

(7) तव + इयम् = ...

Tava + iyam = ...

(8) परम + ईश्वरः = ...

Parama+ īśvaraḥ =..................

(9) महा + ईश्वरः = ...

Mahā + īśvaraḥ = ...

(10) जित + इन्द्रियः = ...

Jita + indriyaḥ =..................

(आ) सन्धिच्छेद कीजिए- Disjoin the following words :-

(1) सूर्योदयः = ... + ...

Sūryōdayaḥ = ... + ...

(2) पुष्पोपवनम् = ... + ...

Puṣpōpavanam = ... + ...

(3) तस्योपदेशः = ... + ...

Tasyōpadēśaḥ = ... + ...

(4) चन्द्रोदयः = ... + ...

Candrōdayaḥ = ... + ...

(5) शिवोपासना = ... + ...

Śivōpāsanā = ... + ...

(6) सुरेन्द्रः = ... + ...

Surēndraḥ = ... + ...

(7) नरेन्द्रः = ... + ...

Narēndraḥ = ... + ...

(8) धीरेन्द्रः = ... + ...

Dhīrēndraḥ = ... + ...

(9) धर्मेन्द्रः = ... + ...

Dharmēndraḥ= .... + ...

(10) वीरेश्वरः = ... + ...

Vīrēśvaraḥ= .... + ...

7. **"यदा ....तदा" की सहायता से रिक्त स्थानों की पूर्ति कीजिए-**
Fill in the blanks with the help of *'Yadā - Tadā'*:—

उदाहरण - यदा अध्यापकः आगमिष्यति तदा छात्राः उत्थास्यन्ति।
Example:- *Yadā adhyāpakaḥ āgamiṣyati **tadā** chātrāḥ utthāsyanti.*

(1) ....वायुः प्रवहति ....पत्राणि पतन्ति।
....................*vāyuḥ pravahati*....................*patrāṇi patanti.*

(2) ....प्रातः भवति ....खगाः कूजन्ति।
....................*prātaḥ bhavati*....................*khagāḥ kūjanti.*

(3) ....अवकाशः भविष्यति ....वयं देशान्तरं गमिष्यामः।
..................*āvakāśaḥ bhaviṣyati*......................*vayaṁ dēśāntaraṁ gamiṣyāmaḥ.*

(4) ....सा गास्यति....................यूयम् नर्तिष्यथ।
....................*sā gāsyati*....................*yūyam nartiṣyatha.*

(5) ....तव जनकः आगमिष्यति....................सः फलानि आनेष्यति।
................*tava janakaḥ āgamiṣyati*....................*saḥ phalāni ānēṣyati.*

(6) ....वृष्टिः भवति ....कृषकाः प्रसीदन्ति।
....................*vṛṣṭiḥ bhavati*....................*kṛṣakāḥ prasīdanti.*

(7) ....अम्बा भोजनं पचति....................अहं तस्याः साहाय्यं करोमि।
..............*ambā bhōjanaṁ pacati*........*ahaṁ tasyāḥ sāhāyyaṁ karōmi.*

(8) ....अश्वः धाविष्यति....................त्वं तस्मात् पतिष्यसि।
....................*aśvaḥ dhāviṣyati*....................*tvaṁ tasmāt patiṣyasi.*

(9) ....शिक्षकः पाठयिष्यति ....छात्राः अवगमिष्यन्ति।
....................*śikṣakaḥ pāṭhayiṣyati*....................*chātrāḥ avagamiṣyanti.*

(10) ....जनाः रुग्णाः भवन्ति ....ते औषधं पिबन्ति।
....................*janāḥ rugṇāḥ bhavanti*....................*tē auṣadhaṁ pibanti.*

8. **उचित शब्द चुनकर रिक्त स्थानों की पूर्ति कीजिए :-**
Choose the correct words and fill in the blanks :-

सः, सा, तत्, ते, तौ, तानि, ताः
Saḥ, Sā, Tat, Tē, Tau, Tāni, Tāḥ.

(1) रामः भरतः च गृहे स्तः।....................तत्र गीतं गायतः।

Rāmaḥ Bharataḥ ca gṛhē staḥ. ....tatra gītaṁ gāyataḥ.

(2) सीता विद्यालयं गच्छति। ....तत्र पठिष्यति।

Sītā vidyālayaṁ gacchati. ....tatra paṭhiṣyati.

(3) अत्र सन्ति मे पुस्तकानि। .... पुस्तकानि मम न सन्ति।

Atra santi mē pustakāni. ....pustakāni mama na santi.

(4) ये बालकाः अत्र क्रीडन्ति ....कुत्र निवसन्ति?

Yē bālakāḥ atra krīḍanti ....kutra nivasanti?

(5) यत् पत्रं तत्र वर्तते ....कस्य अस्ति?

Yat patram tatra vartatē ....kasya asti?

(6) याः बालिकाः गायन्ति ....कस्याम् कक्षायाम् पठन्ति?

Yāḥ bālikāḥ gāyanti....................kasyām kakṣāyām paṭhanti?

(7) यः जनः तत्र तिष्ठति किं ....तव जनकः अस्ति?

Yaḥ janaḥ tatra tiṣṭhati kiṁ ....tava janakaḥ asti?

(8) राजीवः, अभिनवः वीरेन्द्रः च मे मित्राणि सन्ति। ....सर्वे मम विद्यालये एव पठन्ति।

Rājīvaḥ, Abhinavaḥ Vīrēndraḥ ca mē mitrāṇi santi....................sarvē mama vidyālayē ēva paṭhanti.

(9) श्वः लता विनीता च मम गृहम् आगमिष्यतः। ....मम चित्राणि अपि आनेष्यतः।

Śvaḥ Latā Vinītā ca mama gṛham āgamiṣyataḥ....................mama citrāṇi api ānēṣyataḥ.

9. उचित शब्द चुनकर रिक्त स्थानों की पूर्ति कीजिए :–

Choose the correct words given in brackets and fill in the blanks :–

(1) तयोः ....अम्बा अध्यापिका अस्ति। (बालस्य, बालयोः)

Tayōḥ....................ambā adhyāpikā asti. (Bālasya, bālayōḥ)

(2) तस्य ....पुत्रः अस्मिन् विद्यालये पठति। (जनस्य, जनेन)

Tasya............putraḥ asmin vidyālayē paṭhati. (janasya; janēna)

(3) किं त्वं ....सह खेलिष्यसि? (मम, मया)

Kiṁ tvaṁ ....saha khēliṣyasi? (mama, mayā)

(4) ....जनकः किं करोति? (तौ, तव)

....................*janakaḥ kiṁ karōti? (tau, tava)*

(5) अहं ....चित्रे रचयिष्यामि। (आवयोः, युवयोः)

Ahaṁ ....citrē racayiṣyāmi. (āvayōḥ, yuvayōḥ)

(6) ....गृहे के सन्ति? (युष्माकम्, यूयम्)

....................*gṛhē kē santi? (yuṣmākam, yūyam)*

(7) ....नगरे एका नाट्यशाला अस्ति। (अयम्, अस्मिन्)

....................*nagarē ēkā nāṭyaśālā asti. (ayam, asmin)*

(8) अहं...............बालकानां गीतं शृणोमि। (ते, तेषां)

Ahaṁ ....bālakānāṁ gītaṁ śṛṇōmi. (tē, tēṣāṁ)

(9) सा ललना ....किं वदति? (त्वम्, त्वाम्)

Sā lalanā....................kiṁ vadati? (tvam, tvām)

(10) ....गृहे वीणा अस्ति। (अहं, अस्माकं, माम्)

...................*gṛhē vīṇā asti. (ahaṁ, asmākaṁ, mām)*

10. संस्कृत में अनुवाद कीजिए :-

Translate into Sanskrit :

(1) हमारा घर बड़ा है।

Our house is big.

....

(2) उनके मित्र आज शाम को यहाँ गाएँगे।

Their friends will sing here in the evening.

....

(3) तेरा भाई यह पुस्तक कब पढ़ेगा?

When will your brother read this book?

....

(4) दोस्त, क्या तुम मेरे पिता जी के साथ दुकान जाओगे?

Friend, will you go to the shop with my father?

....

(5) कल प्रातः उन लड़कियों की परीक्षा होगी।
Tomorrow morning these girls will be having their examination.
....

(6) तुम दोनों किस शहर में रहते हो?
In which city do you two live?
....

(7) मैं तुम सबके चित्र अभी बनाता हूँ।
I will draw the pictures of all of you right now.
....

(8) आज कौन-कौन मेरे घर आएँगे और मेरे साथ खाना खाएँगे?
Who are those who will come to my place today and have food with me?
....

(9) वे दोनों लड़कियाँ बाग में जाएँगी और फूल लाएँगी।
Those two girls will go to the garden and bring flowers.
....

(10) सीता की बहन उसके लिए मीठे फल लाएगी।
Sita's sister will bring sweet fruits for her.
....

⁂ ⁂ ⁂

चतुर्दशः पाठः — पाठ चौदह

Caturdaśaḥ Pāṭhaḥ — Lesson-14

शब्दकोशः (*Śabda-kośaḥ* :Vocabulary)

अतीव	*Atīva*	बहुत अधिक	Extremely, very, very much
अनुगृहीत	*Anugṛhīta*	आभारी	Grateful
आदि	*Ādi*	इत्यादि	Etc.
ईदृशम्	*Īdṛśam*	इस प्रकार का	Like this (n.)
ईशः, ईश्वरः	*Īśaḥ, Īśvaraḥ*	भगवान्, स्वामी	God, master
उदकम्	*Udakam*	पानी	Water
उपवनम्	*Upavanam*	बाग	Park, orchard
उष्णम्	*Uṣṇam*	गरम	Hot
एतयोः (एतद्)	*Ētayōḥ (Ētad)*	इन दोनों का (में, पर)	Of/on/in these two
औषधम्	*Auṣadham*	दवा	Medicine
कूज्	*Kūj*	चहचहाना	To chirp
कृषकः	*Kṛṣakaḥ*	किसान	Farmer
गजेन्द्रः	*Gajēndraḥ*	हाथियों का मुखिया; बड़ा हाथी	Chief among elephants; big elephant

चन्द्रः	*Candraḥ*	चाँद	Moon
चित्रकारः	*Citrakāraḥ*	चित्र बनाने वाला	Artist
चिरम्	*Ciram*	देर, अधिक समय	Late, delay
जित	*Jita*	विजित, काबू में किया हुआ	Vanquished, controlled
दूरभाषः	*Dūrabhāṣaḥ*	टेलेफोन	Telephone
देशान्तरम्	*Dēśāntaram*	दूसरा देश	Foreign country/place
दृश्यते (दृश्)	*Dṛśyatē (Dṛś)*	दिखाई देता है	Is seen/ is being seen
धीरः	*Dhīraḥ*	हिम्मत वाला	Courageous, patient
नरः	*Naraḥ*	पुरुष, आदमी	Man
नाट्यशाला	*Nāṭyaśālā*	नृत्यशाला	Theatre
परम	*Parama*	सब से बड़ा	Supreme, biggest
प्र + दा	*Pra + dā*	देना	To offer, to give, to present
प्र + वह्	*Pra + vah*	बहना, चलना	To flow, to blow
प्रार्थना	*Prārthanā*	विनती	Prayer, request
पृथक्	*Pṛthak*	अलग, भिन्न	Separate, different
भ्रातः! (भ्रातृ)	*Bhrātaḥ! (Bhrātṛ)*	हे भाई !	O brother, O friend!
महा (महत्)	*Mahā (Mahat)*	बड़ा	Big (m.)
मृगेन्द्र	*Mṛgēndraḥ*	शेर	Lion
रुग्ण	*Rugṇa*	बीमार	Sick
वायुः	*Vāyuḥ*	हवा	Wind, air

वीर	*Vīra*	बहादुर	Brave
वृष्टिः	*Vṛṣṭiḥ*	बारिश	Rain
सफल	*Saphala*	कामयाब	Successful
सुरः	*Suraḥ*	देवता	god
सूर्योदयः	*Sūryōdayaḥ*	सूरज का उगना	Sunrise
स्वी + कृ	*Svī + Kṛ*	स्वीकार करना	To accept/to agree

⁂ ⁂ ⁂

पञ्चदशः पाठः | पाठ पन्द्रह

Pañcadaśaḥ Pāṭhaḥ | Lesson-15

संस्कृताध्ययनम्। *Saṅskṛtādhyayanam.*

संस्कृत का अध्ययन। The Study of Sanskrit.

संस्कृतं हि देवानां भाषा। भाषेयम् अतीव सरला मधुरा समृद्धा च। अस्याम् अनेकानि महान्ति पुस्तकानि सन्ति, यथा वेदाः, उपनिषदः, पुराणानि, रामायणम्, महाभारतम् इत्यादीनि। महाकवेः कालिदासस्यापि रचनाः संस्कृत-भाषायाम् एव सन्ति, यथा अभिज्ञान-शाकुन्तलम्, रघुवंशम्, मेघदूतम्, कुमारसम्भवम् इत्यादीनि। अस्याम् भाषायाम् अनेकाः नीतिकथाः, अनेके कथा-ग्रन्थाः, अनेकानि महाकाव्यानि विविधानि च शास्त्राणि सन्ति।

अस्याः भाषायाः सर्वोत्तमम् व्याकरणम् अष्टाध्यायी अस्ति। अस्य व्याकरणस्य रचयिता महामुनिः पाणिनिः अस्ति। नास्ति संसारे कस्यांचित् अन्यस्यां भाषायाम् अष्टाध्यायी-सदृशम् व्याकरणम्। इमाम् भाषाम् देव-वाणीति वदन्ति।

अस्माकं देशे अस्ति बहूनां जनानाम् रुचिः संस्कृताध्ययने। अत एव देशस्य अनेकेषु स्थानेषु संस्कृतविद्यालयाः सन्ति येषु आबालवृद्धं संस्कृतं पठन्ति लिखन्ति च। अस्माकमयम् विश्वासः अस्ति यत् भाविनि काले जनाः संस्कृत-भाषायाम् न केवलं वार्तालापं करिष्यन्ति अपितु तस्यां रचनाः अपि करिष्यन्ति इति। किम् नास्तीदम् युष्माकमपि अभिमतम्?

वेदेषु गीतोपदेशेषु, पुराणेषु भारतीय-दर्शनेषु च कस्य रुचिः नास्ति? परन्तु संस्कृतज्ञानं विना एतेषां ग्रन्थानाम् अध्ययनं कदापि न सम्भवति। अत एव अस्माभिः सर्वैः संस्कृतस्याध्ययनम् अवश्यमेव कर्त्तव्यम् येन वयं संस्कृतग्रन्थानाम् अनुशीलनं कर्तुम् समर्थाः भवेम। किं-किं पुस्तकं केन-केन लिखितम् इति किं जानन्ति भवन्तः? वेदाः उपनिषदः च ऋषिभिः दृष्याः, पुराणानि च व्यास-मुनिना प्रणीतानि, वाल्मीकिना रामायणम् रचितम् भर्तृहरिणा च नीतिशतकम् इति एवम् अन्यान्यपि। परन्तु कः एतान् सर्वान् ग्रन्थान् पठितुं समर्थः? अतः जनाः संस्कृतग्रन्थानाम् अध्ययनम् यथारुचि करिष्यन्तीति मे मतम्।

Saṁskṛtādhyayanam

Saṁskṛtaṁ hi dēvānāṁ bhāṣā. Bhāṣēyam atīva saralā madhurā samṛddhā ca. Asyām bhāṣāyām anēkāni mahānti pustakāni santi, yathā Vēdāḥ, Upaniṣadaḥ, Purāṇāni, Rāmāyaṇam, Mahābhāratam ityādīni. Mahākavēḥ kālidāsasyāpi racanāḥ Saṁskṛtabhāṣāyām ēva santi, yathā Abhijñana-Śākuntalam, Raghuvaṁśam, Mēghadūtam, Kumārasambhavam ityādīni. Asyām bhāṣāyām anēkāḥ nītikathāḥ, anēkē kathā-granthāḥ, anēkāni mahākāvyāni vividhāni ca śāstrāṇi santi.

Asyāḥ bhāṣāyāḥ sarvōttamam vyākaraṇaṁ Aṣṭādhyāyī asti. Asya vyākaraṇasya racayitā mahāmuniḥ Pāṇiniḥ asti. Nāsti saṁsārē kasyāñcit anyasyāṁ bhāṣāyām Aṣṭādhyāyī-sadṛśam vyākaraṇam. Imām bhāṣām dēva-vāṇīti vadanti.

Asmākaṁ dēśē asti bahūnāṁ janānām ruciḥ Saṁskṛtādhyayanē. Ata ēva dēśasya anēkēṣu sthānēṣu Saṁskṛtavidyālayāḥ santi, yēṣu ābālavṛddham Saṁskṛtaṁ paṭhanti likhanti ca. Asmākamayam viśvāsaḥ asti yat bhāvini kāle janāḥ Saṁskṛta-bhāṣāyām na kēvalaṁ vārtālāpaṁ kariṣyanti, apitu tasyāṁ racanāḥ api kariṣyanti iti. Kim nāstīdam yuṣmākamapi abhimatam?

Vēdēṣu, Gītōpadēśēṣu, Purāṇēṣu bhāratīya-darśanēṣu ca kasya ruciḥ nāsti? Parantu Saṁskṛtajñānaṁ vinā ētēṣāṁ granthānām adhyayanaṁ kadāpi na sambhavati. Ata ēva asmābhiḥ sarvaiḥ Saṁskṛtasyādhyayanam avaśyamēva kartavyam yēna vayaṁ Saṁskṛtagranthānām anuśīlanaṁ kartum samarthāḥ bhavēma. Kiṁ-kiṁ pustakaṁ kēna-kēna likhitam iti kiṁ jānanti bhavantaḥ? Vēdāḥ Upaniṣadaḥ ca ṛṣibhiḥ dṛṣṭāḥ, Purāṇāni Mahābhārataṁ ca Vyāsa-muninā praṇītāni, Vālmīkinā Rāmāyaṇam racitam Bhartṛhariṇā ca Nītiśatakam iti ēvam anyānyapi. Parantu kaḥ ētān sarvān granthān paṭhituṁ samarthaḥ? Ataḥ janāḥ Saṁskṛtagranthānām adhyayanam yathāruci kariṣyantīti mē matam.

संस्कृत का अध्ययन

संस्कृत यथार्थ में देवों की भाषा है। यह भाषा अत्यन्त ही आसान, मधुर एवं सम्पन्न है। इस भाषा में अनेक महत्त्वपूर्ण ग्रंथ रचे गए हैं, जैसे कि वेद, उपनिषद्, पुराण, रामायण, महाभारत इत्यादि। महाकवि कालिदास की भी रचनाएँ इसी भाषा में हैं, जैसे कि अभिज्ञान-शाकुन्तल, रघुवंश, मेघदूत, कुमारसम्भव इत्यादि। इस भाषा में बहुत सी नीति-कथाएँ, कहानी की पुस्तकें, महाकाव्य तथा अनेक प्रकार के शास्त्र पाए जाते हैं। इस भाषा का सबसे अच्छा व्याकरण अष्टाध्यायी है। इस व्याकरण को रचने वाला महामुनि पाणिनि हैं। दुनिया की किसी भी दूसरी भाषा में अष्टाध्यायी जैसा व्याकरण नहीं है। इस भाषा को देव-वाणी कहते हैं।

हमारे देश में बहुत लोग संस्कृत के अध्ययन में रुचि रखते हैं। इसीलिए देश के अनेक स्थानों में संस्कृत की पाठशालाएँ हैं, जहाँ बच्चे से बूढ़े तक बहुत लोग संस्कृत पढ़ते हैं और लिखते हैं। हमारा

विश्वास है कि बाद में लोग संस्कृत-भाषा में न सिर्फ बात-चीत करेंगे बल्कि वे उसमें रचनाएँ भी करेंगे। क्या आप लोगों का भी यह मत नहीं है?

वेदों में, गीता के उपदेशों में, पुराणों में तथा भारतीय दर्शनों में किसकी रुचि नहीं है? परन्तु संस्कृत के ज्ञान के बिना इन ग्रन्थों का अध्ययन बिलकुल सम्भव नहीं है। इसीलिए हम सभी को संस्कृत का अध्ययन अवश्य करना चाहिए जिससे कि हम संस्कृत-ग्रन्थों का अध्ययन करने में समर्थ हो सकें। कौन-सी पुस्तक किस के द्वारा लिखी गई है, क्या आप लोगों को पता है? वेदों तथा उपनिषदों का ऋषियों द्वारा साक्षात्कार हुआ है। पुराण तथा महाभारत व्यास मुनि के द्वारा रचे गए हैं; वाल्मीकि द्वारा रामायण रचा गया है और नीतिशतक भर्तृहरि द्वारा; इसी प्रकार और भी हैं। लेकिन इन सारी पुस्तकों को कौन पढ़ने में समर्थ है? इसीलिए लोग अपनी-अपनी रुचि के अनुसार संस्कृत-ग्रन्थों का अध्ययन करेंगे, ऐसा हमारा विचार है।

The Study of Sanskrit

Sanskrit is indeed a divine language. This language is very easy, sweet and rich. There are many great books in this language, such as the *Vedas*, the *Upanishads*, the *Purāṇas*, the *Rāmāyaṇa*, the *Mahābhārata*, etc. The works of the poet Kalidasa also are in the Sanskrit language itself, such as *Abhijñāna Śākuntala*, *Raghuvaṁsha*, *Mēghadūta*, *Kumārasambhava*, etc. There are in this language numerous moral-stories, many books of fables, great books of poetry and various scriptures.

The best grammar of this language is the *Aṣṭādhyāyī*. The composer of this book of grammar is the great sage Pāṇini. In no other language of the world is there a book of grammar similar to the *Aṣṭādhyāyī*. This language is called 'Celestial Language.'

Many people in our country take interest in the study of Sanskrit. This is why in many regions of the country there are many Sanskrit-schools where young and old read and write Sanskrit. I believe that in due course people will not only converse in Sanskrit but they will also compose in it. Don't you too think so?

Who is not interested in the *Vedas*, in the massage of the *Gita*, in the *Purāṇas* and in the Indian Philosophical texts? But the study of all these texts in not at all possible without a knowledge of Sanskrit. Therefore all of us should study Sanskrit so that we may be able to study the Sanskrit texts. Which book has been written by whom, do you know? The *Vedas* and the *Upanishads* were revealed to the sages; the *Purāṇas* and the *Mahābhārata* have been composed by the Sage Vyasa; the *Rāmāyaṇa* has been written by Vālmīki and the *Nītiśataka* by *Bhartrihari*, and so on. But who is able to read all these books? Therefore, I believe that people will study Sanskrit-books according to their respective interest.

⁂ ⁂ ⁂

पञ्चदशः पाठः
Pañcadaśaḥ Pāṭhaḥ

पाठ पन्द्रह
Lesson-15

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

1. **स्मरण कीजिए :-** सर्वनाम — तद्
Remember:— *Sarvanāma*-**Pronoun** — *Tad*

(क) पुंल्लिङ्गम् **Puṁlliṅgam** विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमा Prathamā	सः *Saḥ*	तौ *Tau*	ते *Tē*
द्वितीया Dvitīya	तम् *Tam*	तौ *Tau*	तान् *Tān*
तृतीया Tṛtīya	तेन *Tēna*	ताभ्याम् *Tābhyām*	तैः *Taiḥ*
चतुर्थी Caturthī	तस्मै *Tasmai*	ताभ्याम् *Tābhyām*	तेभ्यः *Tēbhyaḥ*

पञ्चमी Pañcamī	तस्मात् *Tasmāt*	ताभ्याम् *Tābhyām*	तेभ्यः *Tēbhyaḥ*
षष्ठी Ṣaṣṭhī	तस्य *Tasya*	तयोः *Tayōḥ*	तेषाम् *Tēṣām*
सप्तमी Saptamī	तस्मिन् *Tasmin*	तयोः *Tayōḥ*	तेषु *Tēṣu*

(ख) स्त्रीलिङ्गम् **Strīliṅgam** **विभक्ति** ***Vibhakti***	**एकवचनम्** ***Ēkavacanam*** **एकवचन** **Singular**	**द्विवचनम्** ***Dvivacanam*** **द्विवचन** **Dual**	**बहुवचनम्** ***Bahuvacanam*** **बहुवचन** **Plural**
प्रथमा Prathamā	सा *Sā*	ते *Tē*	ताः *Tāḥ*
द्वितीया Dvitīya	ताम् *Tām*	ते *Tē*	ताः *Tāḥ*
तृतीया Tṛtīya	तया *Tayā*	ताभ्याम् *Tābhyām*	ताभिः *Tābhiḥ*
चतुर्थी Caturthī	तस्यै *Tasyai*	ताभ्याम् *Tābhyām*	ताभ्यः *Tābhyaḥ*
पञ्चमी Pañcamī	तस्याः *Tasyāḥ*	ताभ्याम् *Tābhyām*	ताभ्यः *Tābhyaḥ*
षष्ठी Ṣaṣṭhī	तस्याः *Tasyāḥ*	तयोः *Tayōḥ*	तासाम् *Tāsām*
सप्तमी Saptamī	तस्याम् *Tasyām*	तयोः *Tayōḥ*	तासु *Tāsu*

(ग) नपुंसकलिङ्गम् **Napuṃsakaliṅgam**	एकवचनम् ***Ēkavacanam***	द्विवचनम् ***Dvivacanam***	बहुवचनम् ***Bahuvacanam***
विभक्ति ***Vibhakti***	एकवचन **Singular**	द्विवचन **Dual**	बहुवचन **Plural**
प्रथमा Prathamā	तत् *Tat*	ते *Tē*	तानि *Tāni*
द्वितीया Dvitīya	तत् *Tat*	ते *Tē*	तानि *Tāni*
तृतीया Tṛtīya	तेन *Tēna*	ताभ्याम् *Tābhyām*	तैः *Taiḥ*
चतुर्थी Caturthī	तस्मै *Tasmai*	ताभ्याम् *Tābhyām*	तेभ्यः *Tēbhyaḥ*
पञ्चमी Pañcamī	तस्मात् *Tasmāt*	ताभ्याम् *Tābhyām*	तेभ्यः *Tēbhyaḥ*
षष्ठी Ṣaṣṭhī	तस्य *Tasya*	तयोः *Tayōḥ*	तेषाम् *Tēṣām*
सप्तमी Saptamī	तस्मिन् *Tasmin*	तयोः *Tayōḥ*	तेषु *Tēṣu*

(A) अनेक Aneka (Several)

नित्य बहुवचनान्त (Nitya Bahuvacananta)

पुंल्लिंगम् **Puṁlliṅgam**	स्त्रीलिंगम् **Strīliṅgam**	नपुंसकलिंग **Napuṁsakaliṅgam**
अनेके *Anēkē*	अनेकाः *Anēkāḥ*	अनेकानि *Anēkāni*

अनेकान् *Anekān*	अनेकाः *Anēkāḥ*	अनेकानि *Anēkāni*
अनेकैः *Anēkaiḥ*	अनेकाभिः *Anēkābhiḥ*	अनेकैः *Anēkaiḥ*
अनेकेभ्यः *Anēkēbhyaḥ*	अनेकाभ्यः *Anēkābhyaḥ*	अनेकेभ्यः *Anēkēbhyaḥ*
अनेकेभ्यः *Anēkēbhyaḥ*	अनेकाभ्यः *Anēkābhyaḥ*	अनेकेभ्यः *Anēkēbhyaḥ*
अनेकानाम् *Anēkānām*	अनेकानाम् *Anēkānām*	अनेकानाम् *Anēkānām*
अनेकेषु *Anēkēṣu*	अनेकासु *Anēkāsu*	अनेकेषु *Anēkeṣu*

2. **निम्नलिखित शब्दों के रूप तीनों लिङ्गों में तथा सभी विभक्तियों में लिखिये :-**
   Decline the following words in all the three genders and in all cases :-
   किम्, यद्, एतद्, एक, अन्य।
   Kim, Yad, Ētad, Ēka, Anya.

3. **कोष्ठक में दिये गये शब्दों के उचित रूपों से खाली जगहों को भरिये :-**
   Fill in the blanks with the correct form of the words given in brackets :-

(1) अयम् मम ....(जनक); .... शिक्षकः अस्ति। (तद्)
Ayam mama...............(Janaka); ....śikṣakaḥ asti. (tad)

(2) अत्र द्वौ ....क्रीडतः (बालक); ....कुत्र वसतः? (तद्)
Atra dvau ....krīḍataḥ (Bālaka);...............kutra vasataḥ? (tad)

(3) मम................(अग्रज) तस्य ....(अध्यापक) गृहं गच्छति।
Mama ....(agraja) tasya ....(adhyāpaka) gṛhaṁ gacchati.

(4) रामः ....(चित्र) रचयति; सः ....अपि चित्राणि रचयिष्यति। (अस्मद्-बहु०)
Rāmaḥ.....(citra) racayati; saḥ...........api citrāṇi racayiṣyati. (asmad-bahu.)

(5) अस्य विद्यालयस्य................तत्र गीतं गास्यन्ति। (छात्र)
Asya vidyālayasya...........tatra gītaṁ gāsyanti. (chātra)

(6) अहं तान् ....पश्यामि। (खग)

Ahaṁ tān ....paśyāmi. (khaga)

(7) एते................वृक्षे नीडं रचयन्ति। (खग)

Ētē................vṛkṣē nīḍaṁ racayanti. (khaga)

(8) तम्................(नर) पश्य; ....वाटिकायां पुष्प-पादपं वपति। (तद्)

Tam..........(nara) paśya; ....vāṭikāyāṁ puṣpa-pādapaṁ vapati. (tad)

(9) अम्बा तौ ....वदति। (बाल)

Ambā tau................vadati. (bāla)

(10) किं त्वम् इमौ ....(बालक) जानासि? तौ मम मित्रस्य...............स्तः। (अनुज)

Kiṁ tvaṁ imau........(bālaka) jānāsi? Tau mama mitrasya....staḥ (anuja)

4. **कोष्ठक में दिये गये शब्दों के उचित रूप खाली जगहों में लिखिए :-**

Fill in the blanks with the correct form of the words given in brackets :-

(1) या ....(ललना) तत्र तिष्ठति, सा मम ....अस्ति। (अम्बा)

Yā ....(lalanā) tatra tiṣṭhati, sā mama ....asti. (ambā)

(2) ताम् ....(ललना) पश्य। सा एकां ....आनयति। (वीणा)

Tām ....(lalanā) paśya. Sā ēkāṁ ....ānayati. (vīṇā)

(3) याः ....(बालिका) तत्र तिष्ठन्ति, ताः ....सन्ति। (गायिका)

Yāḥ ....(bālikā) tatra tiṣṭhanti, tāḥ................santi. (gāyikā)

(4) अत्र या...........(छात्रा) आगमिष्यन्ति ताः अस्य विद्यालयस्य.........न सन्ति। (छात्रा)

Atra yāḥ.......(chātrā) āgamiṣyanti tāḥ asya vidyālayasya......na santi. (chātrā)

(5) सुरेन्द्रः याम् ....(अध्यापिका) वदति, सा मम मित्रस्य.........अस्ति। (अम्बा)

Surēndraḥ yām.....(adhyāpikā) vadati, sā mama mitrasya....asti. (ambā)

(6) द्वे ....(मूषिका) तत्र ....(रोटिका) मुष्णीतः।

Dvē ....(mūṣikā) tatra ....(rōṭikā) muṣṇītaḥ.

(7) मम भगिनी ताम् ....(वाटिका) पश्यति।

Mama bhaginī tām ....(vāṭikā) paśyati.

(8) मम नगरे ....(अनेक) पाठशालाः सन्ति।

Mama nagarē................(anēka) pāṭhaśālāḥ santi.

(9) अस्माकम् विद्यालये ....(यद्) अध्यापिकाः सन्ति ताः ....(सर्व) स्नेहेन पाठयन्ति।

Asmākam vidyālayē ....(yad) adhyāpikāḥ santi tāḥ..............(sarva) snēhēna pāṭhayanti.

(10) सः ....(यद्) पाठशालां गच्छति किं................(तद्) दूरे वर्तते?

Saḥ..........(yad) pāṭhaśālāṁ gacchati Kiṁ.................(tad) dūrē vartatē?

5. **कोष्ठक में दिये गये शब्दों के उचित रूप लिखिए :-**

Write down the correct forms of the words given in brackets :—

(1) अम्बा आपणात् पक्वं ....आनेष्यति। (फल)

Ambā āpaṇāt pakvaṁ ....anēṣyati. (phala)

(2) अस्मिन् वृक्षे बहूनि..........................सन्ति। (फल)

Asmin vṛkṣē bahūni ....santi. (phala)

(3) किं राकेशः अजयः च तव..............................स्तः? (मित्र)

Kiṁ Rākēśaḥ Ajayaḥ ca tava......................staḥ? (mitra)

(4) अहं तानि ....इच्छामि। (पुष्प)

Ahaṁ tāni ....icchāmi. (puṣpa)

(5) ....पत्रं त्वं लिखसि (यद्) ....त्वं कस्मै दास्यसि? (तद्)

...............patraṁ tvaṁ likhasi (yad) ....tvaṁ kasmai dāsyasi? (tad)

6. **कोष्ठक में दिये गये शब्दों के उचित रूप लिखिए :-**

Write down the correct forms of the words given in brackets :-

(1) अहं ....सह क्षेत्रं गमिष्यामि। (जनक)

Ahaṁ ....saha kṣētraṁ gamiṣyāmi. (janaka)

(2) वयं........................खादामः (हस्त) ....च वदामः। (मुख)

Vayaṁ ....khādāmaḥ (hasta) ....ca vadāmaḥ. (mukha)

(3) कृषकाः ....(शकट-बहु०) अन्नम् आनयन्ति।

Kṛṣakāḥ ....(śakaṭa-bahu.) annam ānayanti.

(4) तैः ....(बालक) सह कः ग्रामं गमिष्यति?
Taiḥ ....(bālaka) saha kaḥ grāmaṁ gamiṣyati?

(5) सः पुरुषः ....(अश्व) पतति।
Saḥ puruṣaḥ ....(aśva) patati.

(6) पशवः ....(पाद) चलन्ति खगाः च ....(पक्ष) उत्पतन्ति।
Paśavaḥ ....(pāda) calanti khagāḥ ca...................(pakṣa) utpatanti.

(7) ते छात्राः कस्मात् ....(विद्यालय) आगच्छन्ति?
Tē chātrāḥ kasmāt ....(vidyālaya) āgacchanti?

(8) प्रधानमन्त्री अनेकेभ्यः ....(कलाकार) पुरस्कारान् प्रदास्यति।
Pradhānamantrī anēkēbhyaḥ................(kalākāra) puraskārān pradāsyati.

(9) तस्मात् ....(देश) तव..........................(मित्र) किम् आनेष्यन्ति?
Tasmāt ....(dēśa) tava ....(mitra) kim ānēṣyanti?

(10) ते जनाः द्वाभ्याम् ....(ग्राम) अत्र आगमिष्यन्ति।
Tē janāḥ dvābhyām....................(grāma) atra āgamiṣyanti.

7. कोष्ठक में दिये गये शब्दों के उचित रूप लिखिए :-
Write down the correct forms of the words given in brackets :-

(1) तया ....(बालिका) सह स्वस्ती गमिष्यति।
Tayā..........................(bālikā) saha Svastī gamiṣyati.

(2) ताभ्याम् ....(बाला) सह कः आगच्छति?
Tābhyām ....(bālā) saha kaḥ āgacchati?

(3) मम भगिनी ताभिः ....(छात्रा) सह गास्यति।
Mama bhaginī tābhiḥ....................(chātrā) saha gāsyati.

(4) ताभ्यः.....(शाखा) यानि ....(फल) पतिष्यन्ति ....(तद्) अहं ग्रहीष्यामि।
Tābhyaḥ ......(śākhā) yānī ....(phala) patiṣyanti.........(tad) ahaṁ grahīṣyāmi.

(5) मन्त्रिमहोदयः ताभ्यः ....(पाठशाला) पुस्तकानि प्रदास्यति।
Mantrimahōdayaḥ tābhyaḥ..............(pāṭhaśālā) pustakāni pradāsyati.

(6) तस्याः जन्मोत्सवे त्वं.......................(अम्बा) किं दास्यसि?
Tasyāḥ janmōtsavē tvaṁ ....(aṁbā) kiṁ dāsyasi?

(7) पश्य, तस्याः ....(यज्ञशाला) धूमः निस्सरति।
Paśya, tasyāḥ ....(yajñaśālā) dhūmaḥ nissarati.

(8) मम मित्रं ताभ्यां ....(वाटिका) एकाम्-एकाम् ....(लता) आनेष्यति।
Mama mitraṁ tābhyāṁ ....(vāṭikā) ekām-ekām........(latā) ānēṣyati.

8. **कोष्ठक में दिये गये शब्दों के उचित रूप लिखिए :-**
Write down the appropriate forms of the words given in brackets :–

(1) मम ....समीपे एका नदी वर्तते। (गृह)
Mama............................samīpē ēkā nadī vartatē. (gṛha)

(2) तस्य बालस्य ....फलानि सन्ति। (हस्त)
Tasya bālasya...................phalāni santi. (hasta)

(3) तेषां ....मध्ये एकं भवनम् अस्ति। (वन)
Tēṣāṁ ....madhyē ēkaṁ bhavanam asti. (vana)

(4) तव ....कति विद्यालयाः सन्ति? (नगर)
Tava ....kati vidyālayāḥ santi? (nagara)

(5) अस्माकम् ....कश्चिदपि तरण-सरोवरः नास्ति। (ग्राम)
Asmākam ....kaścidapi taraṇa-sarōvaraḥ nāsti. (grāma)

(6) तस्य ....नाम किमस्ति? (चिकित्सक)
Tasya ....nāma kimasti? (cikitsaka)

9. **कोष्ठक में दिये गये शब्दों के उचित रूप लिखिए :-**
Write down the appropriate forms of the words given in brackets :–

(1) तस्याः ....(अध्यापिका) गृहं कुत्रास्ति?
Tasyāḥ ....(adhyāpikā) gṛhaṁ kutrāsti?

(2) तयोः ....(वाटिका) मध्ये एकः मार्गः वर्तते।
Tayōḥ ....(vāṭikā) madhyē ēkaḥ mārgaḥ vartatē.

(3) तासाम् ....(वृद्धा) गृहाणि कुत्र सन्ति?
Tāsām ....(vṛddhā) gṛhāṇi kutra santi?

(4) एतासु ....(शाखा) सुन्दराणि पुष्पाणि सन्ति।
Ētāsu ....(śākhā) sundarāṇi puṣpāṇi santi.

(5) अस्य वृक्षस्य ....(शाखा) वानराः तिष्ठन्ति।
Asya vṛkṣasya ....(śākhā) vānarāḥ tiṣṭhanti.

(6) मम ....(पाठशाला) एकं क्रीडा-क्षेत्रम् अस्ति।
Mama................(pāṭhaśālā) ēkaṁ krīḍā-kṣētram asti.

(7) किं त्वं तयोः ....(लेखिका) पुस्तकानि पठसि?
Kiṁ tvaṁ tayōḥ..............(lēkhikā) pustakāni paṭhasi?

(8) कलाकाराः तयोः ....(नाट्यशाला) किं दर्शयिष्यन्ति?
Kalākārāḥ tayōḥ...............(nāṭyaśālā) kiṁ darśayiṣyanti?

10. (i) सन्धि कीजिए :-

Join the following words :-

(1) तव + अनुजः = ...

Tava + anujaḥ = ...

(2) तस्य + आवासः = ...

Tasya + āvāsaḥ = ...

(3) अम्बा + आगच्छति = ...

Ambā + āgacchati = ...

(4) सरिता + अत्र + आगमिष्यति = ...

Saritā + atra + āgamiṣyati = ...

(5) नदी + इयम् = ...

Nadī + iyam = ...

(6) भगिनी + इव = ...

Bhaginī + iva = ...

(7) अस्ति + इति = ...

Asti + iti = ...

(8) देवी + इच्छति + इयम् = ...

Dēvī + icchati + iyam = ...

(9) साधु + उपदेशः = ...

Sādhu + upadēśaḥ = ...

(10) भानु + उदयः = ...

Bhānu + udayaḥ = ...

(11) सिन्धु + उत्तरम् = ...

Sindhu + uttaram = ...

(12) विष्णु + उपासना = ...

Viṣṇu + upāsanā = ...

(13) स्वादु + उदकम् = ...

Svādu + udakam = ...

(14) मनु + उपदेशः = ...

Manu + upadēśaḥ = ...

(15) वधू + उक्तम् = ...

Vadhū + uktam = ...

(16) सरयू + उत्तरम् = ...

Sarayū + uttaram = ...

(ii) सन्धिच्छेद कीजिए :-

Disjoin the following words :-

(1) हितोपदेशः = ... + ...

Hitōpadēśaḥ = ... + ...

(2) शिवोपासना = ... + ...

Śivōpāsanā = ... + ...

(3) नलोपाख्यानम् = ... + ...

Nalōpākhyānam = ... + ...

(4) जलोपकरणम् = ... + ...

Jalōpakaraṇam = ... + ...

(5) उष्णोदकम् = ... + ...

Uṣṇōdakam = ... + ...

(6) गङ्गोदकम् = ... + ...

Gaṅgōdakam = ... + ...

(7) सूर्योदयः = ... + ...

Sūryōdayaḥ = ... + ...

(8) गणेशः = ... + ...

Gaṇēśaḥ = ... + ...

(9) सुरेशः = ... + ...

Surēśaḥ = ... + ...

(10) दानवेन्द्रः = ... + ...

Dānavēndraḥ = ... + ...

(11) महेश्वरः = ... + ...

Mahēśvaraḥ = ... + ...

(12) परमेश्वरः = ... + ...

Paramēśvaraḥ = ... + ...

(13) प्रश्नोत्तरम् = ... + ...

Praśnōttaram = ... + ...

(14) महोत्सवः = ... + ...

Mahōtsavaḥ = ... + ...

11. इन प्रश्नों के उत्तर संस्कृत में दीजिए :-

Answer the following questions in Sanskrit :-

(1) संस्कृतं कीदृशी भाषा अस्ति?
Saṁskṛtaṁ kīdṛśī bhāṣā asti?

(2) संस्कृत-भाषायाम् किं-किं पुस्तकं लिखितम् अस्ति?
Saṁskṛta-bhāṣāyām kiṁ-kiṁ pustakaṁ likhitam asti?

(3) अभिज्ञानशाकुन्तलं केन लिखितम्?
Abhijñnaśākuntalaṁ kēna likhitam?

(4) संस्कृतस्य सर्वोत्तमं व्याकरणम् किमस्ति?
Saṁskṛtasya sarvōttamaṁ vyākaraṇam kimasti?

(5) संस्कृत-ज्ञानं विना किं न सम्भवति?
Saṁskṛta-jñānaṁ vinā kiṁ na sambhavati?

(6) वेदाः कैः दृष्यः?
Vēdāḥ kaiḥ dṛṣṭāḥ?

(7) वाल्मीकिमुनिना किं लिखितम्?
Vālmīkimuninā kiṁ likhitam?

(8) भगवद्-गीतायां कस्य उपदेशः अस्ति?
Bhagavad-gītāyāṁ kasya upadēśaḥ asti?

(9) संस्कृताध्ययने कस्य रुचिः अस्ति?
Saṁskṛtādhyayanē kasya ruciḥ asti?

(10) रामायणं कस्य कथा अस्ति?
Rāmāyaṇaṁ kasya kathā asti?

12. संस्कृत में अनुवाद कीजिए :-
Translate into Sanskrit :-

(1) रामायण श्रीराम की कथा है।
The Ramayana is the story of Shri Rama.

(2) गीता में श्रीकृष्ण के उपदेश हैं।
There are in the Gita Lord Krishna's teachings.

(3) इस देश में अनेक संस्कृत-पाठशालाएँ हैं।
There are many Sanskrit schools in this country.

(4) उन पाठशालाओं में अनेक लोग संस्कृत पढ़ते हैं।
Many people study Sanskrit in those schools.

(5) संस्कृत देवताओं की भाषा है।
Sanskrit is the language of the gods.

(6) तेरे घर में कौन-कौन सी संस्कृत की पुस्तकें हैं?
Which Sanskrit books are there at your place?

(7) हमारे नगर में अनेक बाग हैं।
There are many gardens in our city.

(8) क्या तुम उन दोनों लड़कों को जानते हो?
Do you know those two boys?

(9) क्या आज तेरे मित्र पुस्तकें ले आएँगे?
Will your friends bring the books today?

(10) उस बच्ची के साथ कौन गाँव में जाएगा? क्या मैं जाऊँ?
Who will go to the village with that little girl? May I go?

* * *

पञ्चदशः पाठः
Pañcadaśaḥ Pāṭhaḥ

पाठ पन्द्रह
Lesson-15

शब्दकोशः *(Śabda-kośaḥ* : Vocabulary)

अध्ययनम्	*Adhyayanam*	पढ़ाई	Study/learning
अन्नम्	*Annam*	भोजन, अनाज	Food, grains
अनन्तरम्	*Anantaram*	बाद में	Afterwards
अनुशीलनम्	*Anuśīlanam*	पढ़ाई / विचार	Study/reflection
अभिमतम्	*Abhimatam*	मत, विचार, इच्छा	Opinion/view
आबालवृद्धम्	*Ābālavṛddham*	बच्चों से बूढ़ों तक, बच्चे-बूढ़े	Young and old
इत्यादिः	*Ityādiḥ*	और भी	Etc.
उत् + पत्	*Ut + Pat*	उड़ना	To fly, to jump
उत्तरम्	*Uttaram*	जवाब	Answer, reply
उपकरणम्	*Upakaraṇam*	औजार, साधन	Tool, instrument, means
उपाख्यानम्	*Upākhyānam*	कहानी	Story, tale, episode
एषा (एतद्)	*Ēṣā (Ētad)*	यह (स्त्रीलिंग)	She/this (f.)
कथा	*Kathā*	कहानी	Story, tale, episode
कदापि	*Kadāpi*	कभी भी	Ever, anytime

कलाकारः	*Kalākāraḥ*	कला जानने वाला	Artist
कर्तुम् (कृ)	*Kartum (Kṛ)*	करने के लिए	(In order) to do
कश्चिदपि	*Kaścidapi*	कोई भी (पुं.)	Anybody, anyone (m.)
कीदृशी	*Kīdṛśī*	कैसी	Of what kind/type (f.)
गंगा	*Gaṅgā*	गंगा नदी	The Ganges
ग्रन्थः	*Granthaḥ*	बड़ी पुस्तक	Thick book, large text
ग्रह्	*Grah*	ग्रहण करना; ले लेना	To hold; to take; to receive
चिकित्सकः	*Cikitsakaḥ*	डाक्टर	Doctor
जन्मोत्सवः	*Janmōtsavaḥ*	जन्मदिन-उत्सव	Birthday-celebration
ज्ञानम्	*Jñānam*	जानकारी	Knowledge
तयोः (तद्)	*Tayōḥ (Tad)*	उन दोनोंका / की / के / में / पर	Of/on/in those two
तरण-सरोवरः	*Taraṇa-sarōvaraḥ*	तैरने का सरोवर	Swimming-pool
दर्शनम्	*Darśanam*	देखना, मिलना	Seeing, encountering, meeting
दर्शय् (दृश्)	*Darśay (Dṛś)*	दिखाना, बताना	To show
दानवः	*Dānavaḥ*	राक्षस	Demon
धूमः	*Dhūmaḥ*	धुआँ	Smoke
निस्+सृ (निस्सरति)	*Nis+Sṛ* *(Nissarati)*	निकलना	To come out
नाट्यशाला	*Nāṭyaśālā*	थीएटर	Theatre
पक्व	*Pakva*	पक्का	Ripe

पशवः (पशु)	*Paśavaḥ (Paśu)*	जानवर (बहु॰)	Animals
पादपः	*Pādapaḥ*	पौधा	Plant, tree
पुरस्कारः	*Puraskāraḥ*	इनाम	Prize, reward
प्रणीतम्	*Praṇītam*	लिखा गया	Written, produced
प्रधानमन्त्री	*Pradhānamantrī*	प्रधान मन्त्री	Prime Minister
प्रश्नः	*Praśnaḥ*	सवाल	Question
बहूनि (बहु)	*Bahūni (Bahu)*	बहुत (नपुं॰)	Many (n.)
भवनम्	*Bhavanam*	इमारत	Building
भवेम (भू)	*Bhavēma (Bhū)*	हम हों, हम बनें	May we be (pl.)
भानुः	*Bhānuḥ*	सूर्य	Sun
भारतीयः	*Bhāratīyaḥ*	हिन्दुस्तानी	Indian
मध्य	*Madhya*	बीच	Middle
महत्	*Mahat*	बड़ा	Big
महाकविः	*Mahākaviḥ*	बड़े कवि	Great poet
महाकाव्यम्	*Mahākāvyam*	बड़ा काव्य	Great literary work
महोदयः	*Mahōdayaḥ*	बड़े आदमी, माननीय	Sir, Respectful Sir
मुष् (मुष्णाति)	*Muṣ (Muṣṇāti)*	चोरी करना, चुराना	To steal, to take away
मूषिका	*Mūṣikā*	चूहिया	Mouse
यज्ञशाला	*Yajñaśālā*	यज्ञस्थल	Shrine, sacrificial hall
येषु (यद्)	*Yēṣu (Yad)*	जिन में (पुं॰, नपुं॰)	In which (pl.) (m.) (n.)

रच्	*Rac*	लिखना, रचना	To write, to create, to arrange
रथः	*Rathaḥ*	गाड़ी	Chariot
रुचिः	*Ruciḥ*	दिलचस्पी	Interest
लिखितम्	*Likhitam*	लिखा गया/ रचा गया	Written, created
लेखिका	*Lēkhikā*	पुस्तक लिखने वाली	Author, writer (f.)
वार्तालापः	*Vārtālāpaḥ*	बात-चीत	Conversation
विना	*Vinā*	(के) बिना	Without
विविधम्	*Vividham*	अनेक प्रकार के	Of different kinds
वृद्धा	*Vṛddhā*	बूढ़ी	Old (f.)
शास्त्रम्	*Śāstram*	धर्म-दर्शन की पुस्तक	Scripture
सम् + भू	*Sam + Bhū*	प्रकट होना, जन्म लेना	To manifest, to incarnate
सम्भवति	*Sambhavati*	सम्भव है	It is possible, probably
समर्थ	*Samartha*	सक्षम, योग्य	Able, qualified
सर्वोत्तम	*Sarvōttama*	सबसे बड़ा, सबसे अच्छा	Best
स्थानम्	*Sthānam*	जगह	Place
स्नेहः	*Snēhaḥ*	प्यार, प्रेम	Love, affection
स्वादु	*Svādu*	मीठा	Sweet
हितम्	*Hitam*	फायदे वाला, लाभप्रद, लाभ	Benefit, beneficial

⁂ ⁂ ⁂

षोडशः पाठः *Ṣōḍaśaḥ Pāṭhaḥ*

पाठ सोलह Lesson-16

अरविन्दः माधवः च। *Aravindaḥ Mādhāvaḥ Ca.*

अरविन्द और माधव। Arvinda and Madhava.

अरविन्दः – भोः मित्र, तम् नरं पश्य। तस्य हस्ते एकं पुस्तकम्, एका लेखनी, एकः ग्रन्थः च सन्ति।

Aravindaḥ – *Bhōḥ mitra, tam naraṁ paśya. Tasya hastē ēkaṁ pustakaṁ, ēkā lēkhanī, ēkaḥ granthaḥ ca santi.*

अरविन्द – हे मित्र, उस आदमी को देखो। उसके हाथ में एक पुस्तक, एक लेखनी और एक ग्रन्थ है।

Aravinda – Oh friend, look at that man. He has in his hand a book, a pen and a thick book.

माधवः – अयि, सः मम गुरुः अस्ति। तस्य पृष्ठतः ये बालकाः आगच्छन्ति, किं त्वं तान् जानासि?

Mādhavaḥ – *Ayi, saḥ mama guruḥ asti. Tasya pṛṣṭhataḥ yē bālakāḥ āgacchanti, kiṁ tvaṁ tān jānāsi?*

माधव – अरे, वे तो मेरे गुरु जी हैं। गुरु जी के पीछे जो लड़के आ रहे हैं क्या तुम उनको जानते हो?

Madhava – Oh! He is my teacher. Do you know the boys who are coming behind him.?

अरविन्दः – आम्, अहं तान् सर्वान् जानामि। तेषां सर्वेषां हस्तेषु अपि पुस्तकानि, लेखन्यः ग्रन्थाः च सन्ति।

Aravindaḥ – *Ām, ahaṁ tān sarvān jānāmi. Tēṣāṁ sarvēṣāṁ hastēṣu api pustakāni, lēkhanyaḥ granthāḥ ca santi.*

अरविन्द – जी हाँ, मैं उन सभी को जानता हूँ। उन सबके हाथों में भी पुस्तकें, लेखनियाँ तथा ग्रन्थ हैं।

Aravinda – Yes, I do know them all. They all have in their hands also books, pens and thick books.

माधवः – ते सर्वे मम पाठशालायाः छात्राः सन्ति। मित्र, तेन अपरेण बालकेन सह कः गच्छति?

Mādhavaḥ – *Tē sarvē mama pāṭhaśālāyāḥ chātrāḥ santi. Mitra, Tēna aparēṇa bālakēna saha kaḥ gacchati?*

माधव – वे सब मेरी पाठशाला के छात्र हैं। मित्र, उस दूसरे लड़के के साथ कौन जा रहा है?

Madhava – They all study at my school. Friend, who is going with that other boy?

अरविन्दः – तेन सह मम अनुजः गच्छति। किं त्वं तौ बालकौ पश्यसि ययोः हस्तयोः द्वे-द्वे पुस्तके स्तः? तौ द्वितीयायां कक्षायां पठतः। ताभ्यां सह मम भगिन्यौ अपि यदा-तदा गच्छतः बालकान् च पाठयतः।

Aravindaḥ – *Tēna saha mama anujaḥ gacchati. Kiṁ tvaṁ tau bālakau paśyasi yayōḥ hastayōḥ dvē-dvē pustakē staḥ? Tau dvitīyāyāṁ kakṣāyāṁ paṭhataḥ. Tābhyāṁ saha mama bhaginyau api yadā-tadā gacchataḥ, bālakān ca pāṭhayataḥ.*

अरविन्द – उसके साथ मेरा छोया भाई जा रहा है। क्या तुम उन दो बच्चों को देख रहे हो जिनके दोनों हाथों में दो-दो पुस्तकें हैं? वे दोनों दूसरी कक्षा में पढ़ते हैं। कभी-कभी मेरी दो बड़ी बहनें भी उनके साथ जाती हैं, और बच्चों को पढ़ाती हैं।

Aravinda – My younger brother is going with him. Do you see those two boys who have in both their hands two books? They study in the second standard. My two elder sisters also sometimes go with them and teach the children.

माधवः – किं त्वं ताभ्याम् बालकाभ्याम् स्व-भगनीभ्याम् च फलानि न नेष्यसि?

Mādhavaḥ – *Kiṁ tvaṁ tābhyām bālakābhyām sva-bhaganībhyām ca phalāni na nēṣyasi?*

माधव – क्या तुम उन दोनों बच्चों के लिए तथा अपनी दोनों बड़ी बहनों के लिए फल नहीं ले जाओगे?

Madhava – Won't you take fruits for those two boys and for your two elder sisters?

अरविन्दः – आम्, अवश्यमेवाहं तयोः बालकयोः कृते मम भगिन्योः कृते च एकम् एकं फलं द्वे-द्वे मोदके अन्यानि वस्तूनि च नेष्यामि। परन्तु त्वमेवं किं चिन्तयसि?

Aravindaḥ – *Ām, avaśyamēvāhaṁ tayōḥ bālakayōḥ kṛtē mama bhaginyōḥ kṛtē ca ēkam ēkaṁ phalaṁ dvē-dvē mōdakē anyāni vastūni ca nēṣyāmi. Parantu tvamēvaṁ kiṁ cintayasi?*

अरविन्द – हाँ, मैं ज़रूर उन दोनों बच्चों के लिए तथा मेरी दोनों बड़ी बहनों के लिए एक-एक फल, दो-दो लड्डू तथा दूसरी चीजें लें जाऊँगा। पर तुम इस प्रकार क्या सोच रहे हो?

Aravinda – Yes, I will certainly take one fruit, two sweets and other things for each of the two boys and my elder sisters. But what are you thinking like this?

माधवः – चिन्तयामि यत् श्वः मम मित्राणि, तेषां च भ्रातरः मम गृहं माम् द्रष्टुम् आगमिष्यन्ति। अतः अहं तेभ्यः सर्वेभ्यः किं दास्यामि इति चिन्तयामि।

Mādhavaḥ – *Cintayāmi yat śvaḥ mama mitrāṇi tēṣāṁ ca bhrātaraḥ mama gṛhaṁ māṁ draṣṭum āgamiṣyanti. Ataḥ ahaṁ tēbhyaḥ sarvēbhyaḥ kiṁ dāsyāmi iti cintayāmi.*

माधव – मैं सोच रहा हूँ कि कल मेरे मित्र और उनके बड़े भाई मुझसे मिलने आएँगे। इसीलिए मैं यह सोच रहा हूँ कि मैं उनको क्या दूँगा।

Madhava – I am thinking that tomorrow my friends and their elder brothers will be coming to see me. Therefore, I am thinking what am I going to give them.

अरविन्दः – नैषः चिन्ता-विषयः। त्वं तेभ्यः सर्वेभ्यः एकैकं संस्कृत-पुस्तकं यच्छ।

Aravindaḥ – *Naiṣaḥ cintā-viṣayaḥ. Tvaṁ tēbhyaḥ sarvēbhyaḥ ēkaikaṁ Saṁskṛta-pustakaṁ yaccha.*

अरविन्द – चिन्ता की कोई बात नहीं। तुम उन सभी को संस्कृत की एक-एक पुस्तक दे दो!

Aravinda – No need to worry! Give them each a Sanskrit-book.

माधवः – सम्यक् उक्तम् त्वया। त्वं यथा वदसि तथैव करिष्यामि। अधुनैव आपणं गच्छामि, एतानि सर्वाणि पुस्तकानि च आनयामि।

Mādhavaḥ – *Samyak uktam tvayā. Tvaṁ yathā vadasi tathaiva kariṣyāmi. Adhunaiva āpaṇaṁ gacchāmi ētāni sarvāṇi pustakāni ca ānayāmi.*

माधव – ठीक कहा तुमने। तुम जैसा कहते हो वैसा ही करूँगा। मैं इसी समय दुकान जाता हूँ और ये सभी पुस्तकें ले आता हूँ।

Madhava – Well said. I'll do as you are saying. I am going to the shop right now and bring these books.

अरविन्दः – परन्तु अहं मन्ये यत् सर्वाणि पुस्तकानि एकस्मिन् एव आपणे न प्राप्स्यन्ते। अत एव कानिचित् पुस्तकानि अन्येषु आपणेषु अपि क्रेतव्यानि।

Aravindaḥ – *Parantu ahaṁ manyē yat sarvāṇi pustakāni ēkasmin ēva āpaṇē na prāpsyantē. Ata ēva kānicit pustakāni anyēṣu āpaṇēṣu api krētavyāni.*

अरविन्द – पर मैं सोचता हूँ कि एक ही दुकान में सभी पुस्तकें नहीं मिलेंगी। इसीलिए कुछ पुस्तकें दूसरी दुकानों से भी खरीदनी पड़ेंगी।

Aravinda – But I think that all the books will not be obtained in a single shop. This is why some books will have to be bought from other shops also.

माधवः – सत्यम्। अस्मिन् नगरे अनेके आपणाः सन्ति येषु बहुविधानि वस्तूनि प्राप्यन्ते। अतः एकाधिकाः आपणाः गन्तव्याः, एतानि च पुस्तकानि आनेतव्यानि। किं त्वम् मया सार्धम् नागमिष्यसि?

Mādhavaḥ – *Satyam. Asmin nagarē anēkē āpaṇāḥ santi yēṣu bahuvidhāni vastūni prāpyantē. Ataḥ ēkādhikāḥ āpaṇāḥ gantavyāḥ, ētāni ca pustakāni ānētavyāni. Kiṁ tvam mayā sārdham nāgamiṣyasi?*

माधव – यह सच है। इस शहर में अनेक दुकानें हैं जिनमें तरह-तरह की चीजें उपलब्ध होती हैं। इसीलिए एक से अधिक दुकान में जाना होगा, और ये पुस्तकें लेनी होंगी। क्या तुम मेरे साथ नहीं चलोगे?

Madhava – True! There are in this city several shops in which different types of things are available. Therefore, I will have to go to more than one shop and buy all these books. Won't you come with me?

अरविन्दः – कथं नागमिष्यामि मित्र? आगम्यते। चल्यताम्। सम्प्रति एव गच्छावः।

Aravindaḥ – *Kathaṁ nāgamiṣyāmi mitra? Āgamyatē. Calyatām. Samprati ēva gacchāvaḥ.*

अरविन्द – मैं क्यों नहीं आऊँगा मित्र? आ रहा हूँ। चलो, इसी समय चलते हैं।

Aravinda – Why won't I come friend? I'm coming. Let's go. We'll go now itself.

माधवः – यथेच्छसि। चल्यताम्।

Mādhavaḥ – *Yathēcchasi. Calyatām.*

माधव – जैसा तुम चाहो। चलो!

Madhava – As you wish. Let's go.

⁂ ⁂ ⁂

षोडशः पाठः — पाठ सोलह
Ṣōḍaśaḥ Pāṭhaḥ — Lesson-16

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

(अ) स्मरण कीजिए पुंल्लिगम् किम् (सर्वनाम)
Remember *Puṁlliṅgam* *Kim (Pronoun)*

विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam* एकवचन Singular	द्विवचनम् *Dvivacanam* द्विवचन Dual	बहुवचनम् *Bahuvacanam* बहुवचन Plural
प्रथमा *Prathamā*	कः *Kaḥ*	कौ *kau*	के *Kē*
द्वितीया *Dvitīyā*	कम् *Kam*	कौ *Kau*	कान् *Kān*
तृतीया *Tṛtīyā*	केन *Kēna*	काभ्याम् *Kābhyām*	कैः *Kaiḥ*
चतुर्थी *Caturthī*	कस्मै *Kasmai*	काभ्याम् *Kābhyām*	केभ्यः *Kēbhyaḥ*
पंचमी *Pañcamī*	कस्मात् *Kasmāt*	काभ्याम् *Kābhyām*	केभ्यः *Kēbhyaḥ*

षष्ठी *Ṣaṣṭhī*	कस्य *Kasya*	कयोः *Kayōḥ*	केषाम् *Kēṣām*
सप्तमी *Saptamī*	कस्मिन् *Kasmin*	कयोः *Kayōḥ*	केषु *Kēṣu*

(आ) स्मरण कीजिए **नपुंसकलिंगम्** **किम् (सर्वनाम)**
Remember ***Napuṁsakaliṅgam*** ***Kim (Pronoun)***

विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमा *Prathamā*	किम् *Kim*	के *Kē*	कानि *Kāni*
द्वितीया *Dvitīyā*	किम् *Kim*	के *Kē*	कानि *Kāni*

शेषं पुंल्लिंगवत् –बाकी रूप पुल्लिंग की तरह।
The remaining forms are the same as in Masculine.

(इ) स्मरण कीजिए **स्त्रीलिंगम्** **किम् (सर्वनाम)**
Remember ***Strīliṅgam*** ***Kim (Pronoun)***

विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमा *Prathamā*	का *Kā*	के *Kē*	काः *Kāḥ*
द्वितीया *Dvitīyā*	काम् *Kām*	के *Kē*	काः *Kāḥ*
तृतीया *Tṛtīyā*	कया *Kayā*	काभ्याम् *Kābhyām*	काभिः *Kābhiḥ*

चतुर्थी *Caturthī*	कस्यै *Kasyai*	काभ्याम् *Kābhyām*	काभ्यः *Kābhyaḥ*
पंचमी *Pañcamī*	कस्याः *Kasyāḥ*	काभ्याम् *Kābhyām*	काभ्यः *Kābhyaḥ*
षष्ठी *Ṣaṣṭhī*	कस्याः *Kasyāḥ*	कयोः *Kayōḥ*	कासाम् *Kāsām*
सप्तमी *Saptamī*	कस्याम् *Kasyām*	कयोः *Kayōḥ*	कासु *Kāsu*

(ई) स्मरण कीजिए **धातु रूप** **वर्तमान काल**

Remember ***Conjugation*** ***Present Tense***

(i) लट् लकारः ***Laṭ Lakāraḥ*** **Present Tense**	कृ *Kṛ (to do)*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमः पुरुषः *Prathamaḥ Puruṣaḥ*	Ist Person	करोति *Karōti*	कुरुतः *Kurutaḥ*	कुर्वन्ति *Kurvanti*
मध्यमः पुरुषः *Madhyamaḥ Puruṣaḥ*	2nd Person	करोषि *Karōṣi*	कुरुथः *Kuruthaḥ*	कुरुथ *Kurutha*
उत्तमः पुरुषः *Uttamaḥ Puruṣaḥ*	3rd Person	करोमि *Karōmi*	कुर्वः *Kurvaḥ*	कुर्मः *Kurmaḥ*

(ii) लट् लकारः *Laṭ Lakāraḥ* **Present Tense**	भू *Bhū* *(to be)*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमः पुरुषः *Prathamaḥ Puruṣaḥ*	Ist Person	भवति *Bhavati*	भवतः *Bhavataḥ*	भवन्ति *Bhavanti*
मध्यमः पुरुषः *Madhyamaḥ Puruṣaḥ*	2nd Person	भवसि *Bhavasi*	भवथः *Bhavathaḥ*	भवथ *Bhavatha*
उत्तमः पुरुषः *Uttamaḥ Puruṣaḥ*	3rd Person	भवामि *Bhavāmi*	भवावः *Bhavāvaḥ*	भवामः *Bhavāmaḥ*

(iii) लट् लकारः *Laṭ Lakāraḥ* **Present Tense**	शक् *Śak* *(to be able)*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमः पुरुषः *Prathamaḥ Puruṣaḥ*	Ist Person	शक्नोति *Śaknōti*	शक्नुतः *Śaknutaḥ*	शक्नुवन्ति *Śaknuvanti*
मध्यमः पुरुषः *Madhyamaḥ Puruṣaḥ*	2nd Person	शक्नोषि *Śaknōṣi*	शक्नुथः *Śaknuthaḥ*	शक्नुथ *Śaknutha*
उत्तमः पुरुषः *Uttamaḥ Puruṣaḥ*	3rd Person	शक्नोमि *Śaknōmi*	शक्नुवः *Śaknuvaḥ*	शक्नुमः *Śaknumaḥ*

स्मरण कीजिए *Remember* **धातु रूप** *Conjugation* **वर्तमान काल** *Present Tense*

(iv) लट् लकारः *Laṭ Lakāraḥ* **Present Tense**	**क्री** *Krī* *(to buy)*	**एकवचनम्** *Ēkavacanam* **एकवचन** **Singular**	**द्विवचनम्** *Dvivacanam* **द्विवचन** **Dual**	**बहुवचनम्** *Bahuvacanam* **बहुवचन** **Plural**
प्रथमः पुरुषः *Prathamaḥ Puruṣaḥ*	Ist Person	क्रीणाति *Krīṇāti*	क्रीणीतः *Krīṇītaḥ*	क्रीणन्ति *Krīṇanti*
मध्यमः पुरुषः *Madhyamaḥ Puruṣaḥ*	2nd Person	क्रीणासि *Krīṇāsi*	क्रीणीथः *Krīṇīthaḥ*	क्रीणीथ *Krīṇītha*
उत्तमः पुरुषः *Uttamaḥ Puruṣaḥ*	3rd Person	क्रीणामि *Krīṇāmi*	क्रीणीवः *Krīṇīvaḥ*	क्रीणीमः *Krīṇīmaḥ*

स्मरण कीजिए *Remember* **धातु रूप** *Conjugation* **भविष्यत्कालः** *Future Tense*

(v) लृट् लकारः *Lṛṭ Lakāraḥ* **Future Tense**	**क्री** *Krī* *(to buy)*	**एकवचनम्** *Ēkavacanam* **एकवचन** **Singular**	**द्विवचनम्** *Dvivacanam* **द्विवचन** **Dual**	**बहुवचनम्** *Bahuvacanam* **बहुवचन** **Plural**
प्रथमः पुरुषः *Prathamaḥ Puruṣaḥ*	Ist Person	क्रेष्यति *Krēṣyati*	क्रेष्यतः *Krēṣyataḥ*	क्रेष्यन्ति *Krēṣyanti*
मध्यमः पुरुषः *Madhyamaḥ Puruṣaḥ*	2nd Person	क्रेष्यसि *Krēṣyasi*	क्रेष्यथः *Krēṣyathaḥ*	क्रेष्यथ *Krēṣyatha*
उत्तमः पुरुषः *Uttamaḥ Puruṣaḥ*	3rd Person	क्रेष्यामि *Krēṣyāmi*	क्रेष्यावः *Krēṣyāvaḥ*	क्रेष्यामः *Krēṣyāmaḥ*

(vi) लृट् लकारः *Lṛṭ Lakāraḥ* **Future Tense**	**ग्रह् *Grah* (to take possession, to hold)**	**एकवचनम् *Ēkavacanam* एकवचन Singular**	**द्विवचनम् *Dvivacanam* द्विवचन Dual**	**बहुवचनम् *Bahuvacanam* बहुवचन Plural**
प्रथम पुरुषः *Prathamaḥ Puruṣaḥ*	Ist Person	ग्रहीष्यति *Grahīṣyati*	ग्रहीष्यतः *Grahīṣyataḥ*	ग्रहीष्यन्ति *Grahīṣyanti*
मध्यमः पुरुषः *Madhyamaḥ Puruṣaḥ*	2nd Person	ग्रहीष्यसि *Grahīṣyasi*	ग्रहीष्यथः *Grahīṣyathaḥ*	ग्रहीष्यथ *Grahīṣyatha*
उत्तमः पुरुषः *Uttamaḥ Puruṣaḥ*	3rd Person	ग्रहीष्यामि *Grahīṣyāmi*	ग्रहीष्यावः *Grahīṣyāvaḥ*	ग्रहीष्यामः *Grahīṣyāmaḥ*

3. **इन धातुओं के रूप लट् तथा लृट् लकारों में लिखिये :-**
Conjugate the following verbs in Present Tense and Future Tense :-

चल्, वद्, पा, दा, नम्।
Cal, Vad, Pā, Dā, Nam.

4. **इन शब्दों के रूप तीनों लिंगों, तीनों वचनों व सातों विभक्तियों में लिखिये :-**
Decline the following words in all the 3 Genders, 3 Numbers and all the seven Cases :-

यद्, तद्, एतद्, सर्व।
Yad, Tad, Ētad, Sarva.

5. **रिक्त स्थानों में उचित शब्द चुनकर लिखिये :-**
Choose the correct words and fill in the blanks :-

(क) अहं तान्..........................पश्यामि। (खगान्, खगौ)।
Ahaṁ tān...........................paśyāmi. (khagān, khagau)

(ख) एकः ....आगच्छति। (साधुः, साधवः)
Ēkaḥ...............................āgacchati. (sādhuḥ, sādhavaḥ)

(ग) मम...............................नाम पतञ्जलिः इति अस्ति। (गुरोः, गुरवे)
Mama.............................nāma patañjaliḥ iti asti. (gurōḥ, guravē)

(घ) एषः बालः ....जनस्य पुत्रः अस्ति। (तेषाम्, तस्य)
Ēṣaḥ bālaḥ ....janasya putraḥ asti. (teṣām, tasya)

(ङ) अम्बा ....सह आपणं गमिष्यति? (कस्य, केन)
Ambā ....saha āpaṇaṁ gamiṣyati? (kasya, kēna)

6. उचित शब्द चुनकर रिक्त स्थानों को भरिये :-
Choose the correct words and fill in the blanks :-

तेन, केन, बालकाभ्याम्, अन्यैः, मया, त्वम्।
Tēna, kēna, bālakābhyām, anyaiḥ, mayā, tvam.

(1) त्वम् ....सह विद्यालयं गच्छसि?
Tvam..............................saha vidyālayaṁ gacchasi?

(2) यदि त्वम् ....सह आगमिष्यसि, तर्हि अहं तुभ्यम् एकं फलं दास्यामि।
Yadi tvam....................saha āgamiṣyasi, tarhi ahaṁ tubhyam ēkaṁ phalaṁ dāsyāmi.

(3) कः ....बालकेन सह तत्र क्रीडति?
Kaḥ ....bālakēna saha tatra krīḍati?

(4) ....कदा मम पुस्तकम् आनेष्यसि?
.......................................kadā mama pustakam ānēṣyasi?

(5) मम जनकः कैश्चित् ....जनैः सह क्षेत्रात् आगच्छति।
Mama janakaḥ kaiścit.........................janaiḥ saha kṣētrāt āgacchati.

(6) सीता ताभ्याम् ....सह गीतं गास्यति।
Sītā tābhyām ....saha gītaṁ gāsyati.

7. कोष्ठक में दी गईं क्रियाओं के उचित रूप लिखिये :-
Write down the proper forms of the verbs given in brackets :-

(1) यदा वर्षा ....(भू) तदा मयूरः नृत्यति।
Yadā varṣā...............(bhū) tadā mayūraḥ nṛtyati.

(2) यदि यूयम् न गास्यथ तर्हि अहमपि न ....(गै)।
Yadi yūyam na gāsyatha tarhi ahamapi na..............(gai).

(3) ते छात्राः कदापि मां न ....(वद्)।
Tē chātrāḥ kadāpi māṁ na............(vad).

(4) या ललना अत्र ....(वस्) सा मम मातुलानी ....(अस्)।
Yā lalanā atra................(vas) sā mama mātulānī.............(as).

(5) युवाम् किं ....(दृश्) इति तेन पृष्टम्।
Yuvām kiṁ..........(dṛś) iti tēna pṛṣṭam.

(6) प्रतिशुक्रवासरं शिव-भक्ताः मन्दिरं गत्वा शिवं..............(नम्)।
Pratiśukravāsaram Śiva-bhaktāḥ mandiraṁ gatvā Śivaṁ..............(nam)

(7) यूयं किं........(पठ्) इति श्रुत्वा ते अवदन्, "वयं हितोपदेशं.......।" (पठ्) इति।
Yūyam kiṁ .... (paṭh) iti śrutvā tē avadan, vayaṁ Hitōpadēśaṁ........ (paṭh) iti.

(8) यदा माता ग्रामं गमिष्यति किं तव अनुजौ अपि तया सार्धम्................(गम्)?
Yadā mātā grāmaṁ gamiṣyati kiṁ tava anujau api tayā sārdham........... (gam)?

8. रिक्त स्थानों में उचित शब्द चुनकर लिखिये :-
Choose the correct words and fill in the blanks :-

तेभ्यः, सर्वेषाम्, एतानि, तेषु, अस्मिन्, अन्येभ्यः।
Tēbhyaḥ, sarvēṣām, ētāni, tēṣu, asmin, anyēbhyaḥ.

(1) ....फलानि पक्वानि सन्ति।
........................*phalāni pakvāni santi.*

(2) ....गृहे कः वसति?
........................*gṛhē kaḥ vasati?*

(3) अहं........................बालकेभ्यः एकम् एकं पुस्तकं प्रदास्यामि।
Ahaṁ.................bālakēbhyaḥ ēkam ēkaṁ pustakaṁ pradāsyāmi.

(4) यानि वस्तूनि अत्र न सन्ति, वयं तानि..............आपणेभ्यः आनेष्यामः।
Yāni vastūni atra na santi, vayaṁ tāni............apaṇēbhyaḥ anēṣyāmaḥ.

(5) किं त्वं ....ग्रहाणां नामानि जानासि?
Kiṁ tvaṁ...........grahāṇāṁ nāmāni jānāsi?

(6) ....वृक्षेषु पक्षिणां नीडानि सन्ति।
.......................*vṛkṣēṣu pakṣiṇām nīḍāni santi.*

9. इन प्रश्नों के उत्तर संस्कृत में दीजिए :-
Answer the following questions in Sanskrit :-

(1) माधवस्य गुरोः हस्ते किम् अस्ति?
Mādhavasya gurōḥ hastē kim asti?
....

(2) गुरोः पृष्ठतः के गच्छन्ति?
Gurōḥ pṛṣṭhataḥ kē gacchanti?
....

(3) सर्वेषाम् बालकानां हस्तेषु किमस्ति?
Sarvēṣām bālakānāṁ hastēṣu kimasti?
....

(4) अरविन्दस्य अनुजः केन सह गच्छति?
Aravindasya anujaḥ kēna saha gacchati?
....

(5) माधवः केभ्यः संस्कृत-पुस्तकानि दास्यति?
Mādhavaḥ kēbhyaḥ Saṁskṛta-pustakāni dāsyati?
....

10. संस्कृत में अनुवाद कीजिए :-
Translate into Sanskrit :-

(1) क्या तुम मेरे साथ घर आओगे?
Will you come home with me?
....

(2) यदि वर्षा होगी तो हम नहीं आएँगे।
We won't come if it rains.
....

(3) कल तेरे पिताजी तुझे कितने पैसे देंगे?
How much money will your father give you tomorrow?
....

(4) इन बच्चों के नाम क्या हैं, क्या कोई जानता है?
Does anybody know what the names of these children are?
....

(5) जिस पाठशाला में तुम लोग पढ़ते हो क्या उसमें सभी बच्चे संस्कृत पढ़ते हैं?
Do all the students study Sanskrit at the school where you all study?
....

(6) जब तेरे भाई आएँगे तो वे उनके लिए अनेक चीज़ें ले आएँगे।
When your brothers will come they will bring many things for them.
....

(7) इन बच्चों को कौन देखेगा?
Who will look after these children?
....

(8) जो लड़कियाँ वहाँ खेल रही हैं वे कल उत्सव में गाएँगी।
The girls who are playing there will sing at the function tomorrow.
....

(9) जो पुस्तकें तुम पढ़ रहे हो क्या उनमें कहानियाँ भी हैं?
Are there stories also in the books you are reading?
....

(10) मेरी बहन उन दो पक्षियों के चित्र बना रही है।
My sister is drawing the pictures of those two birds.
....

⁂ ⁂ ⁂

षोडशः पाठः
Ṣōḍaśaḥ Pāṭhaḥ

पाठ सोलह
Lesson-16

शब्दकोशः (*Śabda-kośaḥ* : Vocabulary)

अतः	*Ataḥ*	इसीलिए	This is why, therefore
अधुनैव	*Adhunaiva*	अभी, इसी समय	Right now, now itself
अपरः	*Aparaḥ*	दूसरा	The other (m.)
अवश्यमेव	*Avaśyamēva*	निश्चय ही	Surely, definitely
उक्तम्	*Uktam*	कहा, बोला	Said
उपदेशः	*Upadēśaḥ*	नैतिक शिक्षा	Moral teaching
एकाधिकम्	*Ēkādhikam*	एक से अधिक	More than one
एकैकम्	*Ēkaikam*	एक-एक, एक-एक को	One by one, to each one
कदापि	*Kadāpi*	कभी	Sometime, someday
क्री	*Krī*	खरीदना	To buy
ग्रन्थः	*Granthaḥ*	बड़ी पुस्तक	Big book, thick book
चिन्त् (चिन्तय्)	*Cint (Cintay)*	सोचना	To think
चिन्ताविषयः	*Cintāviṣayah*	चिन्ता का विषय	Something to be worried about, matter of concern, worry

द्रष्टुम् (दृश्)	*Draṣṭum (Dṛś)*	देखने के लिए	In order to see
नीडः / नीडम्	*Nīḍaḥ / Nīḍam*	खोंता, घोंसला	Nest
पृष्टम् (प्रच्छ्)	*Pṛṣṭam (Pracch)*	पूछा	Asked
पृष्ठतः	*Pṛṣṭhataḥ*	पीछे से, पीछे-पीछे	Following, coming from behind
प्र + दा	*Pra+Dā*	प्रदान करना, देना	To give, to present, to offer
प्राप्त (प्र+आप्)	*Prāpta (Pra+Āp)*	प्राप्त किया/ प्राप्त हुआ	Obtained/received
बहुविधानि	*Bahuvidhāni*	अनेक प्रकार के	Of various kinds
मातुलः	*Mātulaḥ*	मामा	Maternal uncle
मातुलानी, मातुली	*Mātulānī, Mātulī*	मामी	Maternal aunt
हस्तः	*Hastaḥ*	हाथ	Hand

⁂ ⁂ ⁂

सप्तदशः पाठः — पाठ सत्रह

Saptadaśaḥ Pāṭhaḥ — Lesson-17

पुस्तक-विक्रेता। *Pustaka-Vikrētā.*

पुस्तक-विक्रेता। The Bookseller.

अरविन्दः माधवः च – भोः महोदय! नमस्ते!
Aravindaḥ Mādhavaḥ Ca – *Bhōḥ Mahōdaya! Namastē.*
अरविन्द और माधव – हे महाशय! नमस्ते!
Aravinda and Madhava– Good morning, Sir!

आपणिकः – स्वागतं युवयोः। कथ्यताम्, युवां किम् इच्छथः?
Āpaṇikaḥ – *Svāgataṁ yuvayōḥ. Kathyatām, yuvāṁ kim icchathaḥ?*
दुकानदार – तुम दोनों का स्वागत है! कहो, तुम्हें क्या चाहिए?
Shopkeeper – You are both welcome! Tell, what do you want?

अरविन्दः – किं भवतः आपणे संस्कृत-पुस्तकानि उपलभ्यन्ते?
Aravindaḥ – *Kiṁ bhavataḥ āpaṇē Saṁskṛta-pustakāni upalabhyantē?*
अरविन्द – क्या आपकी दुकान में संस्कृत की पुस्तकें उपलब्ध हैं?
Aravinda – Are Sanskrit books available in your shop?

आपणिकः – सन्ति अत्र कानिचित् संस्कृत-पुस्तकानि। त्वं कानि पुस्तकानि इच्छसि?
Āpaṇikaḥ – *Santi atra kānicit Saṁskṛta-pustakāni. Tvaṁ kāni pustakāni icchasi?*
दुकानदार – यहाँ पर संस्कृत की कुछ पुस्तकें हैं। तुम्हें कौन सी पुस्तकें चाहिएँ?
Shopkeeper – There are here a few Sanskrit-books. Which books do you want?

अरविन्दः – अहं महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलम्, तस्यैव रघुवंशम्, भवभूतेः उत्तररामचरितम्, श्रीमद्भगवद्गीता, बालरामायणम् इत्यादीनि पुस्तकानि इच्छामि।

Aravindaḥ – *Ahaṁ mahākavēḥ Kālidāsasya Abhijñānaśākuntalam, tasyaiva Raghuvaṁśam, Bhavabhūtēḥ Uttararāmacaritam, Śrīmadbhagavadgītā, Bālarāmāyaṇam ityādīni pustakāni icchāmi.*

अरविन्द – मुझे महाकवि कालिदास का अभिज्ञानशाकुन्तल, उन्हीं का रघुवंश, भवभूति का उत्तररामचरित, श्रीमद्भगवद्गीता, बालरामायण, इत्यादि पुस्तकें चाहिएँ।

Aravinda – I need the *Abhijñānaśākuntala* of the great poet Kālidāsa, his own *Raghuvaṁśa, the Uttararāmacarita* of Bhavabhūti, the *Bhagavadgītā*, the *Bālarāmāyaṇa*, etc.

आपणिकः – क्षणं तिष्ठ। अहं पश्यामि। (सः आपणान्तरे गच्छति, पुनः बहिः आगत्य वदति) क्षम्यताम् वत्स। अस्माकम् पार्श्वे चत्वारि एव संस्कृत-पुस्तकानि सन्ति-बालरामायणम्, उत्तररामचरितम्, रघुवंशं, श्रीमद्भगवद्गीता चेति।

Āpaṇikaḥ – *Kṣṇaṁ tiṣṭha. Ahaṁ paśyāmi. (Saḥ āpaṇāntarē gacchati, punaḥ bahiḥ āgatya vadati) kṣamyatāṁ vatsa. Asmākaṁ pārśvē catvāri ēva Saṁskṛta-pustakāni santi - Bālarāmāyaṇam, Uttararāmacaritam, Raghuvaṁśam, Śrīmadbhagavadgītā cēti.*

दुकानदार – ज़रा ठहर जाओ! अभी देखता हूँ। (वह दुकान के अन्दर जाता है, फिर बाहर आकर कहता है)- क्षमा करो बेटे! हमारे यहाँ चार ही संस्कृत की पुस्तकें हैं- बालरामायण, उत्तररामचरित, रघुवंश और श्रीमद्भगवद्गीता।

Shopkeeper – Wait a moment! I am finding out. (He goes indside the shop and comes out again and says) - Sorry my son! There are only four Sanskrit books at my place-the *Bālarāmāyaṇa*, the *Uttararāmacarita*, the *Raghuvaṁśa* and the *Bhagavadgitā*.

माधवः – दीयताम् भोः। सम्प्रति एतानि एव क्रीणीवः। आवाम् अन्यानि पुस्तकानि अन्यस्मात् आपणात् नेष्यावः।

Mādhavaḥ – *Dīyatām bhōḥ. Samprati ētāni ēva krīṇīvaḥ. Āvām anyāni pustakāni anyasmāt āpaṇāt nēṣyāvaḥ.*

माधव – कृपया दीजिए। इस समय हम ये ही खरीदते हैं। हम लोग किसी और दुकान से दूसरी पुस्तकें ले लेंगे।

Madhava – Please let us have them. At present we will buy only these ones. We will take the other books from some other shop.

आपणिकः – यच्छामि। नीयताम् भोः!

Āpaṇikaḥ – *Yacchāmi. Nīyatām bhoḥ.*

दुकानदार – मैं देता हूँ! कृपया लीजिए!

Shopkeeper – I'm giving you. Please take!

अरविन्दः – एतेषाम् कियद् मूल्यम् अस्ति?

Aravindaḥ – *Ēteṣām kiyad mūlyam asti?*

अरविन्द – इन सबकी क्या कीमत है?

Aravinda – What is the price of all these?

आपणिकः – वदामि। बालरामायणम् इति विंशतिः रूप्यकाणि, उत्तररामचरितम् इति त्रिंशत् रूप्यकाणि, रघुवंशम् इति अष्टादश रूप्यकाणि, श्रीमद्भगवद्गीता चेति षोडश रूप्यकाणि।

Āpaṇikaḥ – *Vadāmi. Bālarāmāyaṇam iti viṁśatiḥ rūpyakāṇi, Uttararāmacaritam iti triṁśat rūpyakāṇi, Raghuvaṁśam iti aṣṭādaśa rūpyakāṇi, Śrīmadbhagavadgītā cēti ṣōḍaśa rūpyakāṇi.*

दुकानदार – बताता हूँ। बालरामायण के बीस रुपये; उत्तररामचरित के तीस रुपये; रघुवंश के अठारह रुपये तथा श्रीमद्भगवद्गीता के सोलह रुपये।

Shopkeeper – I am telling you. Twenty rupees for the Bālarāmāyaṇa; thirty rupees for the Uttararāmacarita; eighteen rupees for the Raghuvaṁśa and sixteen rupees for the *Bhagavadgītā.*

माधवः – पिण्डीकृत्य कियद् मूल्यं भवति?

Mādhavaḥ – *Piṇḍīkṛtya kiyad mūlyaṁ bhavati?*

माधव – कुल मिलाकर कितने पैसे होते हैं?

Madhava – How much does it cost in all?

आपणिकः – पिण्डीकृत्य चतुरशीतिः रूप्यकाणि भवन्ति।

Āpaṇikaḥ – *Piṇḍīkṛtya caturaśītiḥ rūpyakāṇi bhavanti.*

दुकानदार – कुल मिलाकर चौरासी रुपये होते हैं।

Shopkeeper – In all it costs eighty-four rupees.

अरविन्दः – कृपया नीयताम्! इदमस्ति शत-रूप्यक-पत्रकम्।

Aravindaḥ – *Kṛpayā nīyatām! Idamasti śata-rūpyaka-patrakam.*

अरविन्द – कृपया लीजिए! यह रहा सौ रुपये का नोट।

Aravinda – Please take this! Here is a hundred-rupees-note.

आपणिकः – शेषं यच्छामि। गणयतु – एकं, द्वे, त्रीणि, चत्वारि, पंच, षट्, सप्त, अष्ट, नव, दश, एकादश, द्वादश, त्रयोदश, चतुर्दश, पंचदश, षोडश रूप्यकाणि इति।

Āpaṇikaḥ – *Śēṣaṁ yacchāmi. Gaṇayatu - ēkaṁ, dvē, trīṇi, catvāri, pañca, ṣaṭ, sapta, aṣṭa, nava, daśa, ēkādaśa, dvādaśa, trayōdaśa, caturdaśa, pañcadaśa, ṣōḍaśa rūpyakāṇi iti.*

दुकानदार – मैं बाकी पैसे देता हूँ। गिन लीजिए–एक, दो, तीन, चार, पाँच, छः, सात, आठ, नौ, दस, ग्यारह, बारह, तेरह, चौदह, पन्द्रह, सोलह रुपये!

Shopkeeper – I'm giving you the change. Please count-one, two, three, four, five, six, seven, eight, nine, ten, eleven, twelve, thirteen, fourteen, fifteen, sixteen rupees.

अरविन्दः – धन्यवादः! सम्प्रति गम्यते। नमस्ते!

Aravindaḥ – *Dhanyavādaḥ. Samprati gamyatē. Namastē.*

अरविन्द – धन्यवाद! अब हम चलते हैं। नमस्ते!

Aravinda – Thank you! We are taking leave now. Good-bye!

आपणिकः – भवतु! पुनः आगम्यताम्।

Āpaṇikaḥ – *Bhavatu! Punaḥ āgamyatām.*

दुकानदार – ठीक है! फिर आइये।

Shopkeeper – All right! Do come again!

माधवः – मित्र, चिरम् संजातम्। शीघ्रं गन्तव्यम्।

Mādhavaḥ – *Mitra, Ciram sañjātam. Śīghraṁ gantavyam.*

माधव – मित्र, देर हो गई है। जल्दी जाना चाहिए।

Madhava – Friend, it's late. We have to go quickly.

अरविन्दः – आम् मित्र! अन्यानि अपि पुस्तकानि क्रीत्वा अचिरमेव गृहं गन्तव्यम्। तत्र अन्येऽपि संभाराः कर्तव्याः।

Aravindaḥ – *Ām Mitra! Anyāni api pustakāni krītvā acirамēva gṛhaṁ gantavyam. Tatra anyē'pi sambhārāḥ kartavyāḥ.*

अरविन्द – हाँ मित्र! दूसरी पुस्तकें भी खरीदकर हमें जल्द ही घर जाना चाहिए। वहाँ पर और भी तैयारियाँ करनी हैं।

Aravinda – Yes friend! We need to go back home quickly after buying the other books. We have other preparations as well to make there.

माधवः – चल्यताम्। अहमपि तव किंचित् साहाय्यं करिष्यामि।

Mādhavaḥ – *Calyatām. Ahamapi tava kiñcit sāhāyyaṁ kariṣyāmi.*

माधव – चलो! मैं भी तुम्हारी कुछ मदद करूँगा।

Madhava – Let's go. I will also give you a hand.

अरविन्दः – अस्तु मित्र, चल्यताम्।

Aravindaḥ – *Astu mitra, calyatām.*

अरविन्द – ठीक है मित्र! चलो!

Aravinda – All right friend! Let's go!

⁂ ⁂ ⁂

सप्तदशः पाठः — पाठ सत्रह
Saptadaśaḥ Pāṭhaḥ — Lesson-17

अभ्यास-कार्याणि
(*Abhyāsa-kāryāṇi*)
अभ्यास-कार्य
(Exercises)

(i) स्मरण कीजिए **Remember** पुंल्लिङ्गम् *Pulliṅgam* भवत् *Bhavat*

विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam* एकवचन Singular	द्विवचनम् *Dvivacanam* द्विवचन Dual	बहुवचनम् *Bahuvacanam* बहुवचन Plural
प्रथमा *Prathamā*	भवान् *Bhavān*	भवन्तौ *Bhavantau*	भवन्तः *Bhavantaḥ*
द्वितीया *Dvitīyā*	भवन्तम् *Bhavantam*	भवन्तौ *Bhavantau*	भवतः *Bhavataḥ*
तृतीया *Tṛtīyā*	भवता *Bhavatā*	भवद्भ्याम् *Bhavadbhyām*	भवद्भिः *Bhavadbhiḥ*
चतुर्थी *Caturthī*	भवते *Bhavatē*	भवद्भ्याम् *Bhavadbhyām*	भवद्भ्यः *Bhavadbhyaḥ*
पंचमी *Pañcamī*	भवतः *Bhavataḥ*	भवद्भ्याम् *Bhavadbyām*	भवद्भ्यः *Bhavadbhyaḥ*

षष्ठी *Ṣaṣṭhī*	भवतः *Bhavataḥ*	भवतोः *Bhavatōḥ*	भवताम् *Bhavatām*
सप्तमी *Saptamī*	भवति *Bhavati*	भवतोः *Bhavatōḥ*	भवत्सु *Bhavatsu*

(ii) स्मरण कीजिए **सर्वनाम** **अस्मद्**

Remember ***Sarvanāma*** ***Asmad***

विभक्ति ***Vibhakti***	**एकवचनम्** ***Ēkavacanam*** **एकवचन** **Singular**	**द्विवचनम्** ***Dvivacanam*** **द्विवचन** **Dual**	**बहुवचनम्** ***Bahuvacanam*** **बहुवचन** **Plural**
प्रथमा *Prathamā*	अहम् *Aham*	आवाम् *Āvām*	वयम् *Vayam*
द्वितीया *Dvitīyā*	माम् *Mām*	आवाम् *Āvām*	अस्मान् *Asmān*
तृतीया *Tṛtīyā*	मया *Mayā*	आवाभ्याम् *Āvābhyām*	अस्माभिः *Asmābhiḥ*
चतुर्थी *Caturthī*	मह्यम् *Mahyam*	आवाभ्याम् *Āvābhyām*	अस्मभ्यम् *Asmabhyam*
पंचमी *Pañcamī*	मत् *Mat*	आवाभ्याम् *Āvābhyām*	अस्मत् *Asmat*
षष्ठी *Ṣaṣṭhī*	मम *Mama*	आवयोः *Āvayoḥ*	अस्माकम् *Asmākam*
सप्तमी *Saptamī*	मयि *Mayi*	आवयोः *Āvayoḥ*	अस्मासु *Asmāsu*

(ii) स्मरण कीजिए ज्ञा (जानना)
Remember *Jñā* (To know)

लृट् लकारः *Lṛṭ Lalāraḥ*	भविष्यत् काल *Future Tense*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्र० पु० *Pra. Pu.*	Ist Person	ज्ञास्यति *Jñāsyati*	ज्ञास्यतः *Jñāsyataḥ*	ज्ञास्यन्ति *Jñāsyanti*
म० पु० *Ma. Pu.*	2nd Person	ज्ञास्यसि *Jñāsyasi*	ज्ञास्यथः *Jñāsyathaḥ*	ज्ञास्यथ *Jñāsyatha*
उ० पु० *U. Pu.*	3rd Person	ज्ञास्यामि *Jñāsyāmi*	ज्ञास्यावः *Jñāsyāvaḥ*	ज्ञास्यामः *Jñāsyāmaḥ*

(iii) स्मरण कीजिए गम्- (जाना)
Remember *Gam* (To go)

लोट् लकारः *Lōṭ Lalāraḥ*	आज्ञार्थक *Imperative Mood*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्र० पु० *Pra. Pu.*	Ist Person	गच्छतु *Gacchatu*	गच्छताम् *Gacchatām*	गच्छन्तु *Gacchantu*
म० पु० *Ma. Pu.*	2nd Person	गच्छ *Gaccha*	गच्छतम् *Gacchatam*	गच्छत *Gacchata*
उ० पु० *U. Pu.*	3rd Person	गच्छानि *Gacchāni*	गच्छाव *Gacchāva*	गच्छाम *Gacchāma*

2. **इन धातुओं के रूप लट्, लृट् तथा लोट् लकारों में लिखिए :-**
Conjugate the following verbs in the Present Tense, Future Tense and the Imperative Mood :-

वद्, खाद्, हस्, गै।
Vad, Khād, Has, Gai.

3. **इन शब्दों के रूप सभी विभक्तियों में लिखिये -**
Decline the following words in all the cases :-

खग, मित्र, अम्बा, एतद् (पुं०, स्त्री०, नपुं०)
Khaga, Mitra, Ambā, Ētad (Puṁ, Strī., Napuṁ).

4. **कोष्ठक में दी गईं क्रियाओं को लोट् लकार में लिखिए :-**
Write down the verbs given in brackets in the Imperative Mood :-

(1) रमेश, अत्र ....(आगम्)।
Ramēśa, atra.................(āgam)

(2) मित्र, इदं...........................(दृश्)। किमिदम्?
Mitra, idaṁ....................(dṛś). kimidam?

(3) अम्ब, किं वयं पुस्तकालयं........................(गम्)?
आम्,.....................(गम्), परन्तु शीघ्रम् आगन्तव्यम्।
Amba, kiṁ vayaṁ pustakālayaṁ.................? (gam)
Ām,....................(gam), parantu śīghram āgantavyam.

(4) आचार्य, वयं सर्वे छात्राः सम्प्रति किम् ....(कृ)?
यूयम् सर्वे सम्प्रति स्व-स्व पुस्तकं ....(पठ्) पाठं च..............(लिख्)।
Ācārya, vayaṁ sarvē chāṭrāḥ samprati kim...............? (kṛ)
Yūyam sarvē samprati sva-sva pustakaṁ............(paṭh) pāṭhaṁ ca..........(likh).

(5) सखि, किं मम अनुजः अपि आवाभ्यां सह................(गै?)
आम्, सः अपिः......................(आगम्)..................(गै) च।
Sakhi, kiṁ mama anujaḥ api āvābhyāṁ saha...........? (gai)
Ām! Saḥ api...................(āgam).................ca (gai)

5. **रिक्त स्थानों में उचित क्रिया चुनकर लिखिए :-**
Choose the proper verbs and fill in the blanks :-

नीयताम्, गम्यताम्, क्षम्यताम्, गायन्तु, पठतु, प्रसीद, खादत, लिखताम्

Nīyatām, gamyatām, kṣamyatām, gāyantu, paṭhatu, prasīda, khādata, likhatām.

(1) ....आचार्य, अहम् इदम् न अवगच्छामि।
........................Ācārya, aham idam na avagacchāmi.

(2) बालकाः, यूयम् गच्छत, मिष्टान्नानि च ....।
Bālakāḥ, yūyam gacchata, miṣṭānnāni ca...................

(3) अद्य रमेशः कुत्रचित् न गच्छतु। सः गृहे एव स्थित्वा..............।
Adya Ramēśaḥ kutracit na gacchatu. Saḥ gṛhē ēva sthitvā...............

(4) हे देव, अनया पूजया ....।
Hē Deva, anayā pūjayā................

(5) यदि भवान् इच्छति, तर्हि छात्राः......................?
Yadi bhavān icchati, tarthi chātrāḥ...............?

(6) महोदय, कृपया.....................; इदमस्ति जलम् इदं च फलम्।
Mahōdaya, kṛpayā..............; idamasti jalam idaṁ ca phalam.

(7) तौ बालकौ अपि पाठं................।
Tau bālakau api pāṭhaṁ ....

(8) ....मित्र। श्वः पुनः आगम्यताम्।
.........................mitra. Śvaḥ punaḥ āgāmyatām.

6. रिक्त स्थानों में उचित शब्द चुनकर लिखिए :-

Choose the correct words and fill in the blanks :-

एतानि, तस्मिन्, तस्य, तेषाम्, युवयोः, आवयोः, भवान्, कानिचित्।
Ētāni, tasmin, tasya, tēṣām, yuvayōḥ, āvayōḥ, bhavān, kānicit.

(1) प्रभो,..............................किम् इच्छति? (भवत्)
Prabhō, ...kim icchati? (bhavat)

(2) ....विद्यालये कति छात्राः सन्ति? (युष्मद्)
......................vidyālayē kati chātrāḥ santi? (yuṣmad)

(3) ....वृक्षे एकः वानरः फलं खादति। (तद्)
....................vṛkṣē ēkaḥ vānaraḥ phalaṁ khādati. (tad)

(4) ....बालकानां पुस्तकानि नवीनानि सन्ति। (तद्)
...................bālakānāṁ pustakāni navīnāni santi. (tad)

(5) ....पुष्पाणि अतीव सुन्दराणि सन्ति। (एतद्)
................puṣpāṇi atīva sundarāṇi santi. (ētad)

(6) ....ग्रामः विशालः अस्ति। (अस्मद्)
................grāmaḥ viśālaḥ asti. (asmad)

(7) जनकः मम कृते.....................वस्तूनि आनेष्यति? (किम्)
Janakaḥ mama kṛtē...........vastūni ānēṣyati? (kim)

(8) सः नरः...........गृहस्य स्वामी अस्ति।
Saḥ naraḥ.............gṛhasya svāmī asti. (tad)

7. इन प्रश्नों के उत्तर संस्कृत में लिखिए :-
Answer the following questions in Sanskrit :-

(1) आपणिकः आपणे किं करोति?
Āpaṇikaḥ āpaṇē kiṁ karōti?

....

(2) अरविन्दः माधवः च कुत्र गच्छतः?
Aravindaḥ Mādhavaḥ ca kutra gacchataḥ?

....

(3) आपणं प्रविश्य तौ किं कुरुतः?
Āpaṇaṁ praviśya tau kiṁ kuruṭaḥ?

....

(4) अरविन्दः आपणिकं किं पृच्छति?
Aravindaḥ āpaṇikaṁ kiṁ pṛcchati?

....

(5) तस्मिन् आपणे कति संस्कृत-पुस्तकानि सन्ति?
Tasmin āpaṇē kati Saṁskṛta-pustakāni santi?

....

(6) पिण्डीकृत्य पुस्तकानां मूल्यं किमस्ति?
Piṇḍīkṛtya pustakānāṁ mūlyaṁ kimasti?

....

(7) तौ अन्यानि पुस्तकानि कुत्र क्रेष्यतः?
Tau anyāni pustakāni kutra krēṣyataḥ?

....

(8) सर्वाणि पुस्तकानि नीत्वा तौ किं करिष्यतः?
Sarvāṇi pustakāni nītvā tau kiṁ kariṣyataḥ?

....

8. संस्कृत में अनुवाद कीजिए :-

Translate into Sanskrit :-

(1) मैं कुछ फल और फूल लेकर मंदिर जाऊँगी।
I'll go to the temple carrying some fruits and flowers.
....

(2) माता जी बच्चों के लिए सुन्दर-सुन्दर कपड़े लाएँगी।
Mother will bring beautiful clothes for the children.
....

(3) तू घर जा और थोड़ा सा पानी ले आ।
Go home and bring some water.
....

(4) उन पेड़ों में अब पत्ते नहीं हैं।
There are no leaves now in those trees.
....

(5) भाई, आपका स्वागत है। कहिए, आपको क्या चाहिए?
Welcome brother! Tell, what do your want?
....

(6) कुल मिलाकर तेरी कक्षा में कितने बच्चे हैं?
How many students are there in all in your class?
....

(7) तुम लोग जल्दी करो; गाड़ी जा रही है।
Hurry up you all; the train is leaving.
....

(8) माँ, मुझे थोड़ा दूध और कुछ फल चाहिएँ।
Mother, I want a little milk and some fruits.
....

(9) रघुवंश महाकवि कालिदास की कृति है।
Raghuvaṁśa is the work of the great poet Kālidāsa.
....

(10) क्षमा कीजिए, मुझे नहीं पता है कि वे कितने बजे आएँगे।
Sorry! I don't know at what time they will come.
....

⁂

सप्तदशः पाठः
Saptadaśaḥ Pāṭhaḥ

पाठ सत्रह
Lesson-17

शब्दकोशः (*Śabda-kośaḥ* : Vocabulary)

अचिरमेव	*Acirамēva*	जल्द ही	Quickly, without delay
अन्तरे	*Antarē*	भीतर	Inside
आपणिकः	*Āpaṇikaḥ*	दुकानदार	Shopkeeper
इष् (इच्छ्)	*Iṣ (Icch)*	चाहना, इच्छा करना	To desire, to need
उप–लभ्	*Upa-Labh*	प्राप्त करना, प्राप्त होना, मिलना	To obtain
कथय्	*Kathay*	कहना	To say, to tell
क्षणम्	*Kṣaṇam*	थोड़ी देर	A moment
चिरम्	*Ciram*	देर	Late, delay
नवीनम्	*Navīnam*	नया	New
पिण्डीकृत्य/आहत्य	*Piṇḍīkṛtya/Āhatya*	कुल मिलाकर	In all, all together
पुनः	*Punaḥ*	फिर से	Again
प्र + विश्	*Pra + Viś*	भीतर जाना/आना; प्रवेश करना	To enter
बहिः	*Bahiḥ*	बाहर	Outside
भवत् (भवान्) (पुं०)	*Bhavat (Bhavān) (Puṁ)*	आप (पुं०)	You (for respect) (m.)
मिष्टान्नम्	*Miṣṭānnam.*	मिठाई	Sweet

शत-रूप्यक-पत्रकम्	*Śata-rūpyaka-patrakam*	सौ रुपये का नोट	Hundred-rupee note
शीघ्रम्	*Śīghram*	जल्दी, जल्दी से	Quickly
शेषम्	*Śēṣam*	बाकी	The rest, changes
श्रेष्ठी	*Śrēṣṭhī*	व्यापारी, सेठ	Trader/merchant
सम्भाराः	*Sambhārāḥ*	तैयारियाँ	Preparations

⁂ ⁂ ⁂

अष्टादशः पाठः
Aṣṭādaśaḥ Pāṭhaḥ

पाठ अठारह
Lesson-18

अरविन्दस्य मित्राणि। *Aravindasya Mitrāṇi.*
अरविन्द के मित्र। Aravinda's Friends.

अरविन्दः – स्वागतम् मित्राणि। आगच्छन्तु उपविशन्तु च। एतानि युष्माकम् कृते आसनानि।

Aravindaḥ – *Svāgatam mitrāṇi. Āgacchantu upaviśantu ca. Ētāni yuṣmākam kṛtē āsanāni.*

अरविन्द – मित्रो, स्वागत है। तुम सब आओ और आसन ग्रहण करो। यह तुम लोगों के बैठने की जगह है।

Aravinda – Welcome friends! Come in all of you and have a seat. These seats are meant for you.

मित्राणि – नमस्कारा: मित्र! उपविशामः। त्वमपि उपविश। त्वया सह अयम् अपरः जनः कः अस्ति?

Mitrāṇi – *Namaskārāḥ mitra! Upaviśāmaḥ. Tvamapi upaviśa. Tvayā saha ayam aparaḥ janaḥ kaḥ asti?*

मित्र गण – नमस्कार मित्र! बैठते हैं। तुम भी बैठो। तुम्हारे साथ वह दूसरा व्यक्ति कौन है?

Friends – Good morning, friend! We are taking our seats. Sit down you too. Who is the other person with you?

अरविन्दः – अयम् मम सुहृद् माधवः। माधव, एते मम मित्राणि तेषां च अग्रजाः।

Aravindaḥ – *Ayam mama suhṛd Mādhavaḥ. Mādhava, ētē mama mitrāṇi tēṣāṁ ca agrajāḥ.*

अरविन्द – यह मेरा मित्र माधव है। माधव! ये मेरे मित्र और उनके बड़े भाई हैं।

Aravinda – He is my friend Madhava. Madhava, these are my friends and their elder brothers.

माधवः – भोः मित्राणि, नमस्कारा:। भवतः अत्र दृष्ट्वा अहम् अतीव प्रसीदामि।

Mādhavaḥ – *Bhōḥ mitrāṇi, namaskārāḥ. Bhavataḥ atra dṛṣṭvā aham atīva prasīdāmi.*

माधव – नमस्कार मित्रो! आप लोगों को यहाँ देखकर मुझे बहुत खुशी हो रही है।

Madhava – Oh friends, good morning. I'm indeed very pleased to see you all here.

अरविन्दः – माधव, एतेषां कृते अल्पाहारं पेयं च आनय। अहम् एकैकं मिलित्वा आगच्छामि।

Arvindaḥ – *Mādhava, ētēṣāṁ kṛtē alpāhāraṁ pēyaṁ ca ānaya. Aham ēkaikaṁ militvā āgacchāmi.*

अरविन्द – माधव, तुम इन लोगों के लिए कुछ खाने-पीने की चीज़ें ले आओ। मैं एक-एक से मिलकर आता हूँ।

Aravinda – Madhava, bring something to eat and drink for them. I am coming after meeting every one.

माधवः – अहमपि तव मित्राणि तेषाम् च अग्रजान् मेलितुम् इच्छामि। परन्तु सम्प्रति त्वं तैः सह वार्तालापं कुरु। अनन्तरम् अहं तान् मेलिष्यामि। एष गच्छामि, अल्पाहारं च नीत्वा आगच्छामि।

Mādhavaḥ – *Ahamapi tava mitrāṇi tēṣām ca agrajān mēlitum icchāmi. Parantu samprati tvaṁ taiḥ saha vārtālāpaṁ kuru. Anantaram ahaṁ tān mēliṣyāmi. Ēṣa gacchāmi, alpāhāraṁ ca nītvā āgacchāmi.*

माधव – मैं भी तुम्हारे मित्रों और उनके बड़े भाइयों से मिलना चाहूँगा। परन्तु इस समय तुम उनसे बात-चीत करो। मैं उनसे बाद में मिल लूँगा। अभी मैं जाता हूँ और जल-पान लेकर आता हूँ।

Madhava – I would also like to meet your friends and their elder brothers. But at present you converse with them. I will meet them later. Here do I go and bring some snacks.

अरविन्दः – एवं कुरु। तान् अवलोक्य अहमपि आगच्छामि। (ततः सर्वे परस्परं मिलन्ति वदन्ति च।)

Aravindaḥ – *Ēvaṁ kuru. Tān avalōkya ahamapi āgacchāmi. (Tataḥ sarvē parasparaṁ milanti vadanti ca.)*

अरविन्द – ऐसा ही करो। उनसे मिलकर मैं भी आता हूँ। (उसके बाद सभी लोग एक-दूसरे से मिलते हैं और बातें करते हैं।)

Aravinda – Do so. I'm also coming after meeting them. (Thereafter, they all meet and converse with each other.)

रविः – मित्र हरे! अहं त्वां किंचित् प्रष्टुम् इच्छामि। किं पृच्छानि?

Raviḥ – *Mitra Harē! Ahaṁ tvāṁ kiñcit praṣṭum icchāmi. Kiṁ pṛcchāni?*

रवि – मित्र हरि! मैं तुमसे कुछ पूछना चाहता हूँ। क्या मैं पूछूँ?

Ravi – Friend Hari! I would like to ask you something. May I ask?

हरिः – अवश्यम् पृच्छ मित्र!

Hariḥ – *Avaśyam pṛccha mitra!*

हरि – ज़रूर पूछो मित्र!

Hari – You may certainly ask, friend!

रविः – किं त्वं वक्तुं शक्नोषि यत् वयमद्य किमर्थम् अत्र आगताः स्मः इति?

Raviḥ – *Kiṁ tvaṁ vaktum śaknōṣi yat vayamadya kimartham atra āgatāḥ smaḥ iti?*

रवि – क्या तुम बता सकते हो कि आज हमलोग यहाँ किस लिए आए हैं?

Ravi – Can you say why we have all come here today?

हरिः – किं न जानासि? अद्यैव प्रातःकाले अरविन्दस्य जनकः तीर्थयात्रां कृत्वा आगतः। अतः सर्वेषां कृते अयम् उत्सवस्य अवसरः।

Hariḥ – *Kiṁ na jānāsi? Adyaiva prātaḥkālē Aravindasya janakaḥ tīrthayātrāṁ kṛtvā āgataḥ. Ataḥ sarvēṣām kṛtē ayam utsavasya avasaraḥ.*

हरि – क्या तुम नहीं जानते हो? आज ही सुबह अरविन्द के पिता जी तीर्थ–यात्रा करके वापस आए हैं। इसीलिए यह सभी के लिए खुशी का अवसर है।

Hari – Don't you know? Today itself in the morning Aravinda's father has come back from pilgrimage. This is therefore an occasion for rejoicing for everybody.

रविः – ज्ञातम् सम्प्रति। किं अरविन्दस्य पितृपादाः एकाकिनः एव तीर्थयात्रायां गताः आसन् अथवा अन्यः अपि कश्चित् तैः सह गतः आसीत्?

Raviḥ – *Jñātaṁ samprati. Kim Aravindasya pitṛpādāḥ ēkākīnaḥ ēva tīrthayātrāyāṁ gatāḥ āsan athavā anyaḥ api kaścit taiḥ saha gataḥ āsīt?*

रवि – अब पता चला। क्या अरविन्द के पिताश्री अकेले ही तीर्थयात्रा पर गए थे अथवा और कोई उनके साथ गया था?

Ravi – Now I know. Did Aravinda's father go on pilgrimage alone or was he accompanied by someone else?

हरिः – तस्य पितृपादैः सह तस्य जननी अपि गता आसीत्। पश्य पश्य! एते आगच्छन्ति अस्माकम् मित्रस्य पितृपादाः। तैः सह तस्याम्बापि आगच्छति। ताभ्याम् सह अरविन्दस्य अनुजा अपि अस्ति।

Hariḥ – *Tasya pitṛpādaiḥ saha tasya jananī api gatā āsīt. Paśya paśya! Ēte āgacchanti asmākaṁ mitrasya pitṛpādāḥ. Taiḥ saha tasyāmbāpi āgacchati. Tābhyāṁ saha Aravindasya anujā api asti.*

हरि – उनके पिता जी के साथ उनकी माता जी भी गई थीं। देखो! देखो! हमारे मित्र के पिता जी आ रहे हैं। उनके साथ उनकी माता जी भी हैं। उन दोनों के साथ अरविन्द की छोटी बहन भी है।

Hari – His father was occompanied by his mother. Look! Here comes our friend's father. His mother also is coming with him. Aravinda's younger sister is also with them.

रविः – मन्ये अपरा बाला तस्य भगिनी स्यात्?

Raviḥ – *Manyē aparā bālā tasya bhaginī syāt?*

रवि – मैं सोचता हूँ कि दूसरी लड़की उनकी बड़ी बहन होगी?

Ravi – I believe that the other girl should be his elder sister?

हरिः – आम् रवे। परन्तु सा ताभ्याम् सह न गता आसीत्। सम्प्रति अरविन्दस्य अग्रजः महेन्द्रः किञ्चित् वक्तुम् इच्छति। शृणु।

Hariḥ – *Ām Ravē. Parantu sā tābhyāṁ saha na gatā āsīt. Samprati Aravindasya agrajaḥ Mahēndraḥ kiñcit vaktum icchati. Śṛṇu.*

हरि – हाँ हरि! परन्तु वह उनके साथ नहीं गई थी। इस समय अरविन्द का बड़ा भाई महेन्द्र कुछ बोलना चाहता है। सुनो।

Hari – Yes Hari! But she had not gone with them. At present Aravinda's elder brother Mahendra wants to say something. Listen.

महेन्द्रः – मित्राणि, कृपया श्रूयताम्। मम पितृपादाः युष्मान् किमपि वक्तुम् इच्छन्ति।

Mahēndraḥ – *Mitrāṇi, Kṛpayā śrūyatām. Mama pitṛpādāḥ yuṣmān kimapi vaktum icchanti.*

महेन्द्र – मित्रो! कृपया सुनिये। मेरे पिता जी आप लोगों से कुछ कहना चाहते हैं।

Mahendra – Friends! Please listen. My father wants to tell you something.

जनकः – वत्साः! युष्मान् सर्वान् अत्र दृष्ट्वा अहं अतीव प्रसीदामि। देशान्तरात् युष्माकम् कृते किंचित् आनीतम् मया। अतः एकैकः अत्रागत्य तत् नयतु।

Janakaḥ – *Vatsāḥ! Yuṣmān sarvān atra dṛṣṭvā ahaṁ atīva prasīdāmi. Dēśāntarāt yuṣmākaṁ kṛtē kiñcit ānītaṁ mayā. Ataḥ ēkaikaḥ atrāgatya tat nayatu.*

पिता – बच्चो! तुम सबको यहाँ देखकर मैं बहुत प्रसन्न हूँ। विदेश से मैं तुम लोगों के लिए कुछ लाया हूँ। अतः एक-एक करके यहाँ आकर उसे ले लो।

Father – Children! I'm quite pleased seeing you all here. I have brought something for you from abroad. Therefore, come here one by one and take it.

अरविन्दः – मित्राणि! अहमपि युष्मभ्यम् एकैकं पुस्तकं दातुम् इच्छामि। अतः तदपि नीत्वा गन्तव्यम्।

Aravindaḥ – Mitrāṇi ! Ahamapi yuṣmabhyam ēkaikaṁ pustakaṁ dātum icchāmi. Ataḥ tadapi nītvā gantavyam.

अरविन्द – मित्रो! मैं भी तुम लोगों को एक-एक पुस्तक देना चाहता हूँ। अतः जाने से पहले उसे भी ले लीजिए।

Arvinda – Friends! I too would like to give a book to each one of you. Therefore take that also before leaving.

सर्वाणि मित्राणि – मित्र, वयम् अनुगृहीताः स्मः। धन्यवादः।

Sarvāṇi Mitrāṇi – Mitra, vayam anugṛhītāḥ smaḥ.Dhanyavādaḥ.

सभी मित्र – दोस्त! हम आभारी हैं। धन्यवाद।

All friends – Friend! We are grateful. Thank you!

⁂

अष्टादशः पाठः
Aṣṭādaśaḥ Pāṭhaḥ

पाठ अठारह
Lesson-18

अभ्यास-कार्याणि
(Abhyāsa-kāryāṇi)
अभ्यास-कार्य
(Exercises)

1. (A) **स्मरण कीजिए** **(सर्वनाम)** **(युष्मद्)**
Remember **(Pronoun)** **(Yuṣmad)**

(i) विभक्ति *Vibhakti*	एकवचनम् *Ēkavacanam* एकवचन **Singular**	द्विवचनम् *Dvivacanam* द्विवचन **Dual**	बहुवचनम् *Bahuvacanam* बहुवचन **Plural**
प्रथमा Prathamā	त्वम् *Tvam*	युवाम् *Yuvām*	यूयम् *Yūyam*
द्वितीया Dvitīya	त्वाम् *Tvām*	युवाम् *Yuvām*	युष्मान् *Yuṣmān*
तृतीया Tṛtīya	त्वया *Tvayā*	युवाभ्याम् *Yuvābhyām*	युष्माभिः *Yuṣmābhiḥ*
चतुर्थी Caturthī	तुभ्यम् *Tubhyam*	युवाभ्याम् *Yuvābhyām*	युष्मभ्यम् *Yuṣmabhyam*
पञ्चमी Pañcamī	त्वत् *Tvat*	युवाभ्याम् *Yuvābhyām*	युष्मत् *Yuṣmat*

षष्ठी Ṣaṣṭhī	तव *Tava*	युवयोः *Yuvayōḥ*	युष्माकम् *Yuṣmākam*
सप्तमी Saptamī	त्वयि *Tvayi*	युवयोः *Yuvayōḥ*	युष्मासु *Yuṣmāsu*

(B) धातु रूप – लृट् लकारः भविष्यत् काल

Conjugation *Lṛṭ Lakāraḥ* Future Tense

(i)	**दृश् (देखना)** ***Dṛś* (To see)**	**एकवचनम्** ***Ēkavacanam*** **एकवचन** **Singular**	**द्विवचनम्** ***Dvivacanam*** **द्विवचन** **Dual**	**बहुवचनम्** ***Bahuvacanam*** **बहुवचन** **Plural**
प्र० पु० *Pra. Pu.*	Ist Person	द्रक्ष्यति *Drakṣyati*	द्रक्ष्यतः *Drakṣyataḥ*	द्रक्ष्यन्ति *Drakṣyanti*
म० पु० *Ma. Pu.*	2nd Person	द्रक्ष्यसि *Drakṣyasi*	द्रष्यथः *Drakṣyathaḥ*	द्रक्ष्यथ *Drakṣyatha*
उ० पु० *U. Pu.*	3rd Person	द्रक्ष्यामि *Drakṣyāmi*	द्रक्ष्यावः *Drakṣyāvaḥ*	द्रक्ष्यामः *Drakṣyāmaḥ*

लृट् लकारः भविष्यत् काल

***Lṛṭ Lakāraḥ* Future Tense**

(ii)	**दा (देना)** ***Dā* (To give)**	**एकवचनम्** ***Ēkavacanam*** **एकवचन** **Singular**	**द्विवचनम्** ***Dvivacanam*** **द्विवचन** **Dual**	**बहुवचनम्** ***Bahuvacanam*** **बहुवचन** **Plural**
प्र० पु० *Pra. Pu.*	Ist Person	दास्यति *Dāsyati*	दास्यतः *Dāsyataḥ*	दास्यन्ति *Dāsyanti*
म० पु० *Ma. Pu.*	2nd Person	दास्यसि *Dāsyasi*	दास्यथः *Dāsyathaḥ*	दास्यथ *Dāsyatha*
उ० पु० *U. Pu.*	3rd Person	दास्यामि *Dāsyāmi*	दास्यावः *Dāsyāvaḥ*	दास्यामः *Dāsyāmaḥ*

लृट् लकारः भविष्यत् काल
Lṛṭ Lakāraḥ **Future Tense**

(iii)	नी (लेना, ले जाना) **Nī (To take, to carry)**	एकवचनम् ***Ēkavacanam*** एकवचन **Singular**	द्विवचनम् ***Dvivacanam*** द्विवचन **Dual**	बहुवचनम् ***Bahuvacanam*** बहुवचन . **Plural**
प्र० पु० *Pra. Pu.*	Ist Person	नेष्यति *Nēṣyati*	नेष्यतः *Nēṣyataḥ*	नेष्यन्ति *Nēṣyanti*
म० पु० *Ma. Pu.*	2nd Person	नेष्यसि *Nēṣyasi*	नेष्यथः *Nēṣyathaḥ*	नेष्यथ *Nēṣyatha*
उ० पु० *U. Pu.*	3rd Person	नेष्यामि *Nēṣyāmi*	नेष्यावः *Nēṣyāvaḥ*	नेष्यामः *Nēṣyāmaḥ*

लोट् लकारः आज्ञार्थक
Lōṭ Lakāraḥ **Imperative Mood**

(iv)	दा (यच्छ्) (देना) ***Dā (Yacch)*** **(To give)**	एकवचनम् ***Ēkavacanam*** एकवचन **Singular**	द्विवचनम् ***Dvivacanam*** द्विवचन **Dual**	बहुवचनम् ***Bahuvacanam*** बहुवचन . **Plural**
प्र० पु० *Pra. Pu.*	Ist Person	यच्छतु *Yacchatu*	यच्छताम् *Yacchatām*	यच्छन्तु *Yacchantu*
म० पु० *Ma. Pu.*	2nd Person	यच्छ *Yaccha*	यच्छतम् *Yacchatam*	यच्छत *Yacchata*
उ० पु० *U. Pu.*	3rd Person	यच्छानि *Yacchāni*	यच्छाव *Yacchāva*	यच्छाम *Yacchāma*

(C) क्त्वा-*Katvā*

पठ् + क्त्वा = पठित्वा
Paṭh + *Ktvā* = *Paṭhitvā*
चल् + क्त्वा = चलित्वा
Cal + *Ktvā* = *Calitvā*
कथ् + क्त्वा = कथयित्वा
Kath + *Ktvā* = *Kathayitvā*
खाद् + क्त्वा = खादित्वा
Khād + *Ktvā* = *Khāditvā*
स्था + क्त्वा = स्थित्वा
Sthā + *Ktvā* = *Sthitvā*
नम् + क्त्वा = नत्वा
Nam + *Ktvā* = *Natvā*
वद् + क्त्वा = उदित्वा
Vad + *Ktvā* = *Uditvā*

लिख् + क्त्वा = लिखित्वा
Likh + *Ktvā* = *Likhitvā*
कृ + क्त्वा = कृत्वा
Kṛ + *Ktvā* = *Kṛtvā*
गम् + क्त्वा = गत्वा
Gam + *Ktvā* = *Gatvā*
दृश् + क्त्वा = दृष्ट्वा
Dṛś + *Ktvā* = *Dṛṣṭvā*
प्रच्छ् + क्त्वा = पृष्ट्वा
Pracch + *Ktvā* = *Pṛṣṭvā*
पा + क्त्वा = पीत्वा
Pā + *Ktvā* = *Pītvā*
नी + क्त्वा = नीत्वा
Nī + *Ktvā* = *Nītvā*

2. **इन धातुओं के रूप लट्, लृट् तथा लोट् लकारों में लिखिए :-**
Conjugate the following verbs in (i) Present Tense, (ii) Future Tense and (iii) Imperative Mood :-

पा, नी, स्मृ, कृ, दा।
Pā, Nī, Smṛ, Kṛ, Dā.

3. **उचित शब्द चुनकर रिक्त स्थानों की पूर्ति कीजिए :-**
Choose the proper words and fill in the blanks :-

अस्माकम्, युष्माकम्, तेषाम्, त्वया, तस्मै, कस्मै, केषाम्, कस्यचित्।
Asmākam, Yuṣmākam, Tēṣām, Tvayā, Tasmai, Kasmai, Kēṣām, Kasyacit.

(1) ....जनानां ग्रामे विद्युत् नास्ति। (तद्)
..................*janānāṁ grāmē vidyut nāsti. (tad)*

(2) ....देशे केचित् उन्नतपर्वताः सन्ति। (अस्मद्)।
..................*dēsē kēcit unnataparvatāḥ santi. (asmad)*

(3) किं ते अपि ....सार्धम् गमिष्यन्ति? (युष्मद्)
Kiṁ tē api.................sārdham gamiṣyanti? (yuṣmad)

(4) एकः चौरः ....जनस्य रूप्यकाणि हृत्वा पलायते। (किम्)
Ēkaḥ cauraḥ..............janasya rūpyakāṇi hṛtvā palāyatē. (kim)

(5) ....श्रीगुरवे नमः। (तद्)
......................Śrīguravē namaḥ. (Tad)

(6) अहमपि कदाचित् ....देशम् आगमिष्यामि। (युष्मद्)
Ahamapi kadācit...................dēśam āgamiṣyāmi. (yuṣmad)

(7) अत्र ....पुस्तकानि सन्ति? (किम्)
Atra......................pustakāni santi? (kim)

(8) आचार्य, इदं पत्रं ....दातव्यम्? (किम्)
Ācārya, idaṁ patraṁ..............dātavyam? (kim)

4. कोष्ठक में दी गईं क्रियाओं के उचित रूप लिखिए :-
Write down the correct forms of the verbs given in brackets :-

(1) युष्माकम् कार्यं दृष्ट्वा अहं भृशम् ....। (प्र-सद्-लट्)
Yuṣmākaṁ kāryaṁ dṛṣṭvā ahaṁ bhṛśam..............(pra-sad-laṭ)

(2) किं मया सह कश्चिद् ....? (आ-गम्-लृट्)
Kiṁ mayā saha kaścid....................? (a-gam-lṛṭ)

(3) वत्स, ...(उद्-स्था-लोट्); जनकेन सह ....! (गम्-लोट्)
Vatsa, ...(ud-sthā-lōṭ); janakēna saha..............! (gam-lōṭ)

(4) गायकाः आगच्छन्तु गीतानि च ....। (गै-लोट्)
Gāyakāḥ āgacchantu gītāni ca.............(gai-lōṭ)

(5) यदि तौ छात्रौ न ....(पठ्-लृट्) तर्हि तौ परीक्षायां सफलौ न...........। (भू-लृट्)
Yadi tau chātrau na............(paṭh-lṛṭ) tarhi tau parīkṣāyāṁ saphalau na..........(bhū-lṛṭ)

5. उचित शब्द चुनकर रिक्त स्थानों की पूर्ति कीजिए :-
Choose the proper words and fill in the blanks :-

गत्वा, आगत्य, पठित्वा, नीत्वा, पीत्वा, दृष्ट्वा, पृष्ट्वा, प्राप्य।
Gatvā, āgatya, paṭhitvā, nītvā, pītvā, dṛṣṭvā, pṛṣṭvā, prāpya.

(1) पुस्तकं .... पाठं लिखत।
Pustakaṁ.............pāṭhaṁ likhata.

(2) गृहं.....................त्वम् किं करिष्यसि?
Gṛhaṁ.............tvam kiṁ kariṣyasi?

(3) सः दुग्धं..................विद्यालयं गच्छति।
Saḥ dugdhaṁ................vidyālayaṁ gacchati.

(4) सर्पम् ....मयूरः तम् आक्रामति।
Sarpam....................mayūraḥ tam akrāmati.

(5) रूप्यकाणि......................त्वम् आपणं गच्छ।
Rūpyakāṇi.................tvam apaṇaṁ gaccha.

(6) तत् स्थानं ....ते अतीव प्रसन्नाः आसन्।
Tat sthānaṁ...........tē atīva prasannāḥ āsan.

(7) मम गृहम्.....................यूयं किंचित् खादत।
Mama gṛham.............yūyaṁ kiñcit khādata.

(8) रामः जनकं प्रश्नं...................कार्यं करोति।
Rāmaḥ janakaṁ praśnaṁ................kāryaṁ karōti.

6. (क) सन्धि कीजिए :-
Join the following words :-

एक	+	एकः	=	मम	+	एषः	=
Ēka	+	*Ēkaḥ*	=	*Mama*	+	*Ēṣaḥ*	=
मत	+	ऐक्यम्	=	तस्य	+	एव	=
Mata	+	*Aikyam*	=	*Tasya*	+	*Ēva*	=
तव	+	एतद्	=	विना	+	एव	=
Tava	+	*Ētad*	=	*Vinā*	+	*Ēva*	=

6. (ख) सन्धिच्छेद कीजिए :-
Disjoin the following words :-

मैवम्	=	....	बालैषा	=	....
Maivam	=	....	*Bālaiṣā*	=	....
लतयैतया	=	....	अद्यैव	=	....
Latayaitayā	=	....	*Adyaiva*	=	....
एकैव	=	....	अधुनैव	=	....
Ēkaiva	=	....	*Adhunaiva*	=	....

7. **इन प्रश्नों के उत्तर संस्कृत में दीजिए :-**
Answer the following questions in Sanskrit :-

(1) अरविन्दस्य मित्रस्य अभिधानं किमस्ति?
Aravindasya mitrasya abhidhānaṁ kimasti?
....

(2) माधवः अरविन्दस्य मित्राणां कृते किमानयति?
Mādhavaḥ Aravindasya mitrāṇāṁ kṛtē kimānayati?
....

(3) कस्य जनकः देशान्तरं गतः आसीत्?
Kasya janakaḥ dēśāntaraṁ gataḥ āsīt?
....

(4) अरविन्दस्य जनकः किमर्थम् देशान्तरं गतः आसीत्?
Aravindasya janakaḥ kimarthaṁ dēśāntaraṁ gataḥ āsīt?
....

(5) जनकः अरविन्दस्य मित्रेभ्यः किं कथयति?
Janakaḥ Aravindasya mitrēbhyaḥ kiṁ kathayati?
....

(6) अरविन्दः स्व-मित्रेभ्यः किं यच्छति?
Aravindaḥ sva-mitrēbhyaḥ kiṁ yacchati?
....

(7) जनकः देशान्तरात् कदा आगतः?
Janakaḥ dēśāntarāt kadā āgataḥ?
....

(8) जनकेन सह का तीर्थयात्रायां गता आसीत्?
Janakēna saha kā tīrthayātrāyāṁ gatā āsīt?
....

8. **संस्कृत में अनुवाद कीजिए :-**
Translate into Sanskrit :-

(1) अगले साल मैं भी तीर्थयात्रा पर जाऊँगा।
Next year I will also go on pilgrimage.
....

(2) गत साल उसके माता–पिता विदेश गये थे।
Last year his parents had gone abroad.

....

(3) वह हमारे लिए कुछ मिठाइयाँ और कुछ फल ले आएगा।
He will bring some sweets and fruits for us.

....

(4) मित्रो, तुम लोगों का स्वागत है!
Friends! Welcome to you all!

....

(5) माँ, क्या मैं भैया के साथ जाऊँ?
Mother! May I go with elder brother?

....

(6) नहीं, अभी तू मत जा; तुझे कहीं और जाना है।
No, don't go; you have to go elsewhere.

....

(7) तुम लोग अपने अध्यापकों से पूछो कि पाठशाला में छुट्टी कब मिलेगी।
Ask your teachers when will there be holiday at school.

....

(8) बारह बजे हम लोग कहीं घूमने नहीं जाते हैं, बल्कि पाठशाला के ही आँगन में रहकर खेलते हैं।
At noon we don't go to roam anywhere, but we rather stay in the playground of the school itself and play.

....

(9) वे दोनों दुकान जाकर दूध, चावल, चीनी, और नमक ले आएँ।
May they both go to the shop and bring milk, rice, sugar and salt.

....

(10) घर जाकर अभी तुम क्या करोगे? मेरे साथ चलो; कुछ देर तक फुटबॉल खेलेंगे।
What will you do after going home at present? Come with me; we'll play football for sometime.

....

अष्टादशः पाठः
Aṣṭādaśaḥ Pāṭhaḥ

पाठ अठारह
Lesson-18

शब्दकोशः (*Śabda-Kośaḥ* : Vocabulary)

अद्यैव	*Adyaiva*	आज ही	Today itself
अधुना	*Adhunā*	इस समय, अब, अभी	Now, at present
अनुगृहीतः	*Anugṛhītaḥ*	आभारी	Grateful
अल्पाहारः	*Alpāhāraḥ*	नाश्ता	Breakfast, tiffin
अवलोक्य(अव-लोक्)	*Ava-Lōkya (Ava-Lōk)*	देखकर	After seeing; having seen
आ + क्रम्	*Ā+Kram*	हमला करना	To attack
आ + गतः (आ + गम्)	*Ā+Gataḥ (Ā+gam)*	आया	Has come, arrived(m.)
आसीत् (अस्)	*Āsīt (As)*	था, थी	Was
एकाकी	*Ēkākī*	अकेले	Alone (m.)
किमर्थम्	*Kimartham*	किस लिए, क्यों	Why
चौरः	*Cauraḥ*	चोर	Thief
ततः	*Tataḥ*	उसके बाद, फिर, तब	Then
तीर्थ-यात्रा	*Tīrtha-yātrā*	पवित्र स्थलों की यात्रा	Pilgrimage
देशान्तरम्	*Dēśāntararam*	दूसरा देश	Foreign country
धन्यवादः	*Dhanyavādaḥ*	शुक्रिया	Thanks

पलायते	*Palāyatē*	भागता/ ती है	Runs away
पितृपादाः	*Pitṛpādāḥ*	आदरणीय पिता	Respectful father
पेयम्	*Pēyam*	पीने की चीज़	Drink (n.)
प्रच्छ् (पृच्छ्)	*Pracch (Pṛcch)*	पूछना	To ask
भृशम्	*Bhṛśam*	अत्यधिक	Greatly, extremely
मा	*Mā*	मत, न	No, do not
वच्	*Vac*	बोलना	To speak, to talk
वत्सः	*Vatsaḥ*	बच्चा	Child, son
विना	*Vinā*	बिना	Without
शक्	*Śak*	सकना	To be able

⁂ ⁂ ⁂

नवदशः पाठः
Navadaśaḥ Pāṭhaḥ

पाठ उन्नीस
Lesson-19

छात्राणाम् उत्सवः। *Chātrāṇām Utsavaḥ.*
छात्रों का उत्सव। Students Festivity.

शैलेन्द्रः – भ्रातः, अद्य विद्यालये अस्माकम् अन्तिमः दिवसः अस्ति, यतः श्वःप्रभृति अवकाशः भविष्यति। किम् अद्यापि पठन-कार्यं भविष्यति?

Śailēndraḥ – *Bhrātaḥ, adya vidyālayē asmākam antimaḥ divasaḥ asti, yataḥ śvaḥ-prabhṛti avakāśaḥ bhaviṣyati. Kim adyāpi paṭhana-kāryaṁ bhaviṣyati?*

शैलेन्द्र – भाई, आज स्कूल में हमारा अन्तिम दिन है, क्योंकि कल से छुट्टी है। क्या आज भी पढ़ाई होगी?

Shailendra – Brother, today is our last day at the school, for as from tomorrow there will be holiday. Will there be classes today also?

विनयः – नहि, अद्य तु विद्यालये उत्सवः भविष्यति। तदनन्तरम् सहभोजनमपि भविष्यति।

Vinayaḥ – *Nahi, adya tu vidyālayē utsavaḥ bhaviṣyati. Tadanantaraṁ sahabhōjanamapi bhaviṣyati.*

विनय – नहीं, आज तो स्कूल में उत्सव होगा। उसके बाद सहभोज भी होगा।

Vinaya – No, today there will be entertainment-programme at the school. After that there will be a get-together also.

इन्द्राणी – तर्हि गायनं-नर्तनं चापि भविष्यति?

Indrāṇī – *Tarhi gāyanaṁ nartanaṁ cāpi bhaviṣyati?*

इन्द्राणी – तो फिर नाच-गान भी होगा?

Indrani – Therefore there will be programmes of song and dance as well?

सुभद्रा – कथं न? अहम् एकं गीतं गास्यामि। त्वं किं श्रावयिष्यसि, सुबुद्धे?

Subhadrā – *Kathaṁ na? Aham aṁ gītaṁ gāsyāmi.Tvaṁ kiṁ śrāvayiṣyasi, Subuddhē?*

सुभद्रा – क्यों नहीं? मैं एक गीत गाऊँगी। तुम क्या सुनाओगी, सुबुद्धि?

Subhadra – Why not? I will sing a song. What are you going to present, Subuddhi?

सुबुद्धिः – अहं नर्तिष्यामि। अहं भरत-नाट्यं दर्शयिष्यामि। (तदैव उत्सवः प्रारभ्यते)

Subuddhiḥ – *Ahaṁ nartiṣyāmi. Ahaṁ Bharata-nāṭyaṁ darśayiṣyāmi. (Tadaiva utsavaḥ prārabhyatē)*

सुबुद्धि – मैं नाचूँगी। मैं भरत-नाट्यम् दिखाऊँगी। (उसी समय उत्सव प्रारम्भ होता है।)

Subuddhi – I will dance. I will perfom the *Bharata-Nāṭyaṁ.* (At that very moment the programme starts.)

बलरामः – बान्धवाः, सम्प्रति अस्माकम् सहपाठी शिवकुमारः पद्यमेकम् श्रावयितुम् इच्छति। अतः ध्यानेन शृण्वन्तु।

Balarāmaḥ – *Bāndhavāḥ, samprati asmākaṁ sahapāṭhī Śivakumāraḥ padyamēkam śrāvayitum icchati. Ataḥ dhyānēna śṛṇvantu.*

बलराम – मित्रो, इस समय हमारे सहपाठी शिवकुमार एक पद्य सुनाना चाहता हैं। कृपया ध्यान से सुनें।

Balaram – Friends, at present our classmate Śivakumāra would like to recite a verse. Please listen attentively.

शिवकुमारः – शशिना च निशा, निशया च शशी।
शशिना निशया च विभाति नभः।।
पयसा कमलम्, कमलेन पयः।
पयसा कमलेन विभाति सरः।।

Śivakumāraḥ – *Śaśinā ca niśā, niśayā ca śaśī;*
śaśinā niśayā ca vibhāti nabhaḥ;
payasā kamalam, kamalēna payaḥ;
payasā kamalēna vibhāti saraḥ.

शिवकुमार – रात्रि चन्द्रमा से, चन्द्रमा रात्रि से।
रात्रि और चन्द्रमा, दोनों से ही आकाश सुशोभित होता है।
जल से कमल, कमल से जल।
जल और कमल, दोनों से ही तालाब सुशोभित होता है।

Shivakumara – "By the moon the night,
By the night the moon;
By (both) the moon and the night
The sky appears beautiful.
By water, the lotus flower,
By the lotus flower, water;
By (both) water and the lotus flower,
The lake appears beautiful."

सर्वे – अतिसुन्दरम्! अतिसुन्दरम्! स्मरणीयमेव पद्यमेतद्।

Sarvē – *Atisundaram! Atisundaram! Smaraṇīyamēva padyamētad.*

सभी लोग – बहुत सुन्दर! बहुत सुन्दर! यह पद्य सचमुच याद करने योग्य है।

Everybody – Very beautiful! Very beautiful! This verse needs indeed to be remembered.

भगवती – अहं श्लोकत्रयं कथयामि। श्रूयताम्!

(1) धर्मार्थकाममोक्षेषु वैचक्ष्ण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्।।

(2) नैनं छिन्दन्ति शस्त्राणि, नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापः, न शोषयति मारुतः।।

(3) अयं निजः परो वेति गणना लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्।।

Bhavagatī – *Ahaṁ ślōkatrayaṁ kathayāmi. Śrūyatām!*

(i) Dharmārthakāma-mōkṣēṣu vaicakṣṇyaṁ kalāsu ca;
karōti kīrtiṁ prītiṁ ca sādhukāvya-nibandhanam.

(ii) Nainaṁ chindanti śastrāṇi, nainaṁ dahati pāvakaḥ;
na cainaṁ klēdayantyāpaḥ, na śōṣayati mārutaḥ.

(iii) Ayaṁ nijaḥ parō vēti gaṇanā laghucētasām;
Udāracaritānāṁ tu vasudhaiva kuṭumbakam.

भगवती – मैं तीन श्लोक सुनाती हूँ। सुनिये–

(1) धर्म, अर्थ, काम, मोक्ष तथा कलाओं में जो कीर्ति और रुचि उत्पन्न करे, वही उत्तम काव्य कहलाता है।

(2) इसे हथियार काट नहीं सकते; इसे आग जला नहीं सकती, इसे जल भिगो नहीं सकता, इसे न हि हवा सुखा सकती है।

(3) यह मेरा है, यह पराया है; यह है संकुचित बुद्धि वालों की सोच।
विशाल हृदय वालों के लिए तो यह सारा ही संसार एक परिवार है।

Bhagavati – I am reciting three verses. Please listen.

(i) That which leads to fame and induces interest in Dharma, Artha, Kāma, Mōkṣa and the arts, that itself is the best among Classics.

(ii) Weapons can not cleave It, nor the fire burn;
nor do the waters drench It, nor the wind dry.

(iii) This is mine, this is others':
This is the thinking of the narrow-minded persons;
But for the broad-minded persons
This whole world is one family.

सर्वे – साधु मित्र! साधु!

Sarvē – *Sādhu Mitra! Sādhu!*

सभी लोग – बहुत अच्छा मित्र, बहुत अच्छा!

Everybody – Very good, friend; very good!

मंजुला – इमं श्लोकत्रयं श्रुत्वा ममापि संस्कृतं पठितुम् इच्छा भवति। किं युष्माकमपि ईदृशीच्छा न भवति?

Mañjulā – *Imaṁ ślōkatrayaṁ śrutvā mamāpi Saṁskṛtaṁ paṭhitum icchā bhavati. Kiṁ yuṣmākamapi īdṛśīcchā na bhavati?*

मंजुला – इन तीन श्लोकों को सुनकर संस्कृत पढ़ने की मेरी भी इच्छा हो रही है। क्या तुम लोगों की भी ऐसी इच्छा नहीं हो रही है?

Manjula – After hearing these three verses I also feel like studying Sanskrit. Don't you too feel like this?

सर्वे – अस्मिन् विषये तु न काचित् विमतिः अस्ति, अपितु मतैक्यमेव वर्तते। वयं सर्वे अवश्यं संस्कृतं पठितुम् इच्छामः।

Sarvē – *Asmin viṣayē tu na kācit vimatiḥ asti, apitu mataikyamēva vartatē. Vayaṁ sarvē avaśyaṁ Saṁskṛtaṁ paṭhitum icchāmaḥ.*

